सं स्कृ त प्र ति भा

SAMSKRITA PRATIBHA

नवम उन्मेषः
प्रथमो विलासः
१९७१
IX 1
1971

साहित्य अकादेमी, नवदेहली

Samskrita Pratibha, a Half-yearly Journal

Editor: Dr. V. Raghavan

Annual Subscription: Rs. 6, 14 *s.* or $ 2 (inclusive of postage)

Single copy: Rs. 3 (inclusive of postage)

Send your literary contributions to the Editor

Send your subscriptions and advertisements to the Secretary, Sahitya Akademi, Rabindra Bhavan, 35, Ferozeshah Road, New Delhi-1.

Advertisement Rates

Inside Full page:	General Rs. 100;	for Books Rs. 50.
Inside Half page:	General Rs. 50;	for Books Rs. 25.
3rd Cover:	General Rs. 150;	for Books Rs. 75.
4th Cover:	General Rs. 200;	for Books Rs. 100.

Mechanical Data
Size: Demy Octavo ($8\frac{1}{2}" \times 5\frac{1}{2}"$)
Print Area: $7" \times 4"$
Line Measure: 24-ems

Edited and published by Dr. V. Raghavan for Sahitya Akademi (35, Feroze Shah Road, New Delhi), at 7, Sri Krishnapuram Street, Royapettah, Madras-14; and printed at the M.L.J. Press Private Ltd., Madras-4

सं स्कृ त प्र ति भा

SAMSKRITA PRATIBHA

नवम उन्मेषः
प्रथमो विलासः
१९७१
IX 1
1971

साहित्य अकादेमी, नवदेहली

संस्कृतप्रतिभा नवम उन्मेषः, प्रथमो विलासः
१९७१
साहित्य-अकादेमी, नवदेहली

विषयानुक्रमणिका—

सम्पादकीयम्

खण्डकाव्यानि—

१. अयोगयोगः-डा. वे. राघवः १
२. चन्द्रकलाषोडशी-नल्लान् चक्रवर्ति कृष्णमाचार्यः ५
३. अभीप्सा-राधावल्लभः त्रिपाठी १०
४. अमरबाला-डा० वि. ए. शर्मा ११
५. रसो वै सः-डा० अर्कसोमयाजी १५
६. मनोरथः-डा. वे. राघवः १४
७. रुचिररुचिश्च-डा. वे. राघवः १५
८. सम्मार्जनीसंस्तवः-जग्गू शिङ्गरार्यः १६

गद्यबन्धः—

९. महाकविः कण्टकः-राधावल्लभः त्रिपाठी २२

रूपकम्—

१०. लक्ष्मीलाञ्छनम्-भास्कराचार्य त्रिपाठी ४८

अनुवादाः—

११. श्रीपरकालसूरेः गाथाः-श्री श्रीनिवासाचार्यः ५५
१२. मनोबोधः-उत्तरार्धः-विश्वनाथकेशव छत्रे ६४
१३. मधुशाला-माधव देश पाण्डे

निकषोपलः—(पुस्तकविमर्शः)— ८३

जैमिनि साम (तलवकारशाखिनां) सन्ध्यावन्दनप्रयोगः (टि. राजगोपाल अय्यङ्गार्); भारद्वाजसूत्रश्राद्धप्रयोगः (श्रीसुब्रह्मण्यदीक्षितः); कठोपनिषत् साङ्ग्लानु-

वादा (पि. कृष्णमूर्तिः); श्रीगणेशाथर्वशीर्षोपनिषत् (कै. म. म. श्रीधरशास्त्रिवारे); वेदकालीन-जनतन्त्रस्थानानि (अग्निहोत्रं रामानुजताताचार्यः); जीवनज्योतिः अथवा वैदिक-गीताञ्जलिः (डा० मङ्गलदेवशास्त्री); गीतार्थसङ्ग्रहः, गीतार्थसङ्ग्रहरक्षा च (श्री वीरराघवाचार्यः); शाक्तदर्शनम (श्री चक्रेश्वर भट्टाचार्य); न्यायमञ्जरी (को. सु. वरदाचार्यः); शाब्दतरङ्गिणी (पं. वे. सुब्रह्मण्यशास्त्री); भाषायोगवासिष्ठसार (ज्ञानसार) (श्रीकवीन्द्राचार्यसरस्वती); श्रीवल्लभाचार्याः, तेषा वेदान्तमार्गः, मतं च (श्री जे. जि. षा); श्रीस्तुतिः, अभीतिस्तवश्च (मधुरान्तकं श्रीवीरराघवस्वामिनः) श्रीस्तुतिः (पि. कृष्णमूर्तिः); श्रीवेङ्कटेशविशेषवैभवस्तोत्रम् (मुल्लण्ड्. एस्. वि. रामनाथघनपाठी); श्रीयादवगिरिलक्ष्मीनृसिंहप्रपत्तिः (सी. एस्. वेङ्कटाचार्यः); श्रीराधाकृष्णप्रभा (ग. जो. सोमयाजी); चाणक्यनीतिशाखासंप्रदायः (लड्डिक्-स्टेर्ण-बाक्); भारतेतिहासः (पं. इन्द्रो विद्यावाचस्पतिः); श्रीतिलकयशोऽर्णवः(माधवश्री हरि अणे); मेघदूतम् (सुशीलकुमारः दे; द्वितीयं संस्करणं वे. राघवः); सकलो विद्यार्थी (श्री रामचन्द्रो भारती); पर्यटनशूरः सिन्दबादः (प्र. द. य. गम्भीरः), सिद्धार्थचरितम् (डा० वीरेन्द्रकुमारभट्टाचार्यः); निवेद्यम् (के. केशवन् नायर्); रहस्यमयी (के. रा. जोशी); प्रवरवरूथिनीयम् (सन्निधानं सूर्यनारायणशास्त्री); वाणी (श्रीकर्णवीर-राजशेषगिरिराव्); संस्कृतगीति-काव्यानुचिन्तनम् (डा० नेमिचन्द्रशास्त्री); साहित्यरत्नकोशे काव्यसंग्रहः (नि० अग्रवाला, सं. वे. राघवः); प्रतापरुद्रीयम् (डा. वे. राघवः); व्याकरणचन्द्रोदयम् (श्रीचारुदेवशास्त्री); वैद्यक-सारोद्धारः (धर्मनाथतर्कतीर्थः, प्रतापचन्द्रचौधुरी च); चरकचिन्तनम (आचार्य प्रियव्रतशर्मा); स्मृतिज्योतिषसारसङ्ग्रहः (श्रीमनोरञ्जनशास्त्री, श्रीप्रतापचन्द्रचौधुरी च); विश्वामित्रसंहिता, न्यायकल्पलतिका (तिरुप्पति केन्द्रीयसंस्कृतविद्यापीठम्); काश्मीरेतिहासः, गीति-कादम्बरी, प्रमाणप्रमोदः, अध्वरमीमांसाकुतूहलवृत्तिः (श्रीलालबहादूरशास्त्री-केन्द्रीयसंस्कृतविद्यापीठम्); शारदा (विवेकानन्दविशेषाङ्कः); प्रतिभोत्कर्षः (ल. पै. सुन्दरगोपालाचार्यः).

सम्पादकीयम् —

साहित्य-अकादेमी-परिषदा विविधभाषासु प्रतिवर्षं प्रमुखतया निश्चितेभ्यो ग्रन्थेभ्यो यानि पारितोषिकानि पञ्चसहस्ररूप्यात्मकानि दीयन्ते, तत्र १९७०-वर्षीयं मुख्यसंस्कृतग्रन्थविषयकं पारितोषिकं पण्डितराज वे. सुब्रह्मण्यशास्त्रिभिर्विरचिताय 'शाब्द-तरङ्गिणी'-नाम्ने ग्रन्थाय वितीर्णम् । स्वतन्त्रो ग्रन्थोऽयं शाब्दबोधप्रकारं नैयायिकरीत्या उपन्यस्य दर्शनान्तरदृष्ट्या विचारयति । अस्य विमर्शनमस्यामेव प्रतिभा-सञ्चिकायां प्रकाशितम् । पारितोषिकमिदं पण्डितराजेभ्यः मार्च्-२८ तमे दिने मद्रपुर्यां श्रीकुप्पुस्वामि-शास्त्रि-समीक्षा-समिति रजतोत्सवावसरे साहित्य-अकादेमी-अध्यक्षैः भाषाशास्त्रधुरीणैः भूतपूर्व-संस्कृतायोगाध्यक्षैः श्रीसुनीति-कुमार-चटुर्ज्या महाशयैः महति संस्कृतविज्ञ-प्रेमिमण्डिते सदसि समर्पितम् । पारितोषिकस्वीकाराय पण्डितराजानुपस्थापयन्तः प्रतिभासम्पादकाः ग्रन्थकाराणां न्यायवेदान्तपारङ्गतत्वं स्तुतम्; साहित्य-अकादेमी-सकाशात् पूर्वं संस्कृतपारितोषिकं नूतनकाव्यग्रन्थैः, आङ्ग्ल-हिन्दी-वारम्यां लिखितैः संस्कृतविषयकचर्चाग्रन्थैरासादितम्; अस्मिन्नेव वर्षे इदंप्रथमतया शास्त्रीयो ग्रन्थः साहित्य-अकादेमी-परिषदः संस्कृतपारितोषिकं लभत इति चोक्तम् ।

प्रतिभाया अभिनन्दनं पण्डितराजेभ्य उपहरामः ।

* * *

सैयद् मोहम्मद् रेस् जलालि नैनि नामकः ऐरेनियप्राचार्यो विद्वत्कविः सप्तपञ्चाशद्वर्षीयः पारसीकभाषायां ऋग्वेदं माण्डूक्योपनिषदं चानूदितवान् । भारतदेशं प्राप्तो मार्च्-मासान्ते वाराणसीहिन्दुविश्वविद्यालयेन डी. लिट्. बिरुदप्रदानेन सत्कृतः । अनेन भारतीयदर्शनविदुषा भारतीयदर्शनसंस्कृतिविषये बहवो ग्रन्थाः प्रकाशिताः, येषु "आर्य-हिन्दू"

नामको मुख्यतयोदाहरणमर्हति । प्राचीने काले देशयोरनयोरिरान्-भारतयोर्योऽतिनिबिडं सौभ्रात्रमासीत्तदनुस्यूतिरिदानींतनेऽपि समयेऽप्यावश्यकी । विद्वद्भिरीदृशैः परिपोष्यत इति महते सौभाग्यायेदं देशानां मिथस्सांस्कृतिक-सहयोगाभिवृद्धये च ।

* * *

केन्द्रीयशिक्षामन्त्रालयेन या प्रतिसंस्कृता राष्ट्रीयसंस्कृतपरिषत्स्थापिता, तया भारते जम्बूक्षेत्रे, प्रयागे, पूरीक्षेत्रे च प्रचरन्ति संस्कृत-स्थापनानि त्रीणि केन्द्रीयसंस्कृतविद्यापीठत्वेन स्वीकृतानि । प्रथमं तिरुपतिक्षेत्रे, ततो देहल्यां च ये द्वे पूर्वमेव कार्यं कुरुतः, तम्यां सह अद्य पञ्च संस्कृतविद्यापीठानि केन्द्रीयशिक्षामन्त्रालयद्वारा निर्व्यूढसर्वकार्याणि भविष्यन्ति । देशे तत्र तत्र लब्धप्रतिष्ठाः संस्कृतकार्यं निरन्तरं कुर्वाणाः संस्थाः धनसाह्यवैरल्येण कथञ्चिद् विदुषां सेवापराणां प्रातिस्विकप्रयासैः प्रचाल्यमाना वर्तन्ते ताभ्योऽपि राष्ट्रीयपरिषदा द्रव्यानुग्रहः पर्याप्तो देयः ।

* * *

तादृशीषु संस्थासु दक्षिणादिशि मद्रास्-नगरे प्रतिष्ठिता श्रीकुप्पुस्वामि-शास्त्रि-समीक्षा-समितिः विशिष्योदाहरणमर्हति । नास्याः पञ्चविंशतिवर्ष-जीविते शासकीय उपकारः केन्द्रतो वा प्रान्ततो वा लब्धः । गतेषु कतिपय-वर्षेषु अतिस्वल्पं किमपि साह्यं केन्द्रीयसंस्कृतपरिषदा वितीर्णम् । प्रायः संस्कृतविद्वद्भिः, संस्कृताभिमानिभिः संस्कृतिसंरक्षणबद्धश्रद्धैश्च सुहृद्भिः कृतोपष्टम्भा समितिरियं न केवलं संस्कृतपुस्तकालयं, किन्तु नूतनानि ग्रन्थ-प्रकाशनानि शोधपत्रिकां च वार्षिकीं, तदा तदा विद्वद्भिर्निर्वर्तिता व्याख्यान-

मालाश्च प्रचालयन्ती संस्कृतप्रपञ्चे दृढां प्रतिष्ठां लब्धवती परिपूरितपञ्च-विंशतिवर्षवरिवस्या विराजते । अस्या गते मार्च्-मासान्ते २७, २८-तमदिनयोः रजतमहोत्सवो निर्वर्त्तितः । उत्सवप्रसिद्धैर्भाषा-विद्वद्वरिष्ठैः, भारतीयविमर्शविद्वद्गोष्ठीगरिष्ठैः, राष्ट्रीयप्राध्यापकैः, पूर्वं संस्कृतायोगाध्यक्षैरद्यत्वे साहित्य-अकादेमी-परिषदध्यक्षैः डा. श्रीसुनीतिकुमारचटुर्ज्यामहोदयैः कृतोप-क्रमः समीचीनया रीत्या दिनद्वयं यावत् प्राचलत् । उपक्रमभाषणा-नन्तरं लक्ष्मणपुरीविश्वविद्यालयवाराणसेयसंस्कृतविश्वविद्यालययोः भूतपूर्वाध्यक्षैः प्रख्यातैः संस्कृतप्राचार्यैः श्री के. ए. सुब्रह्मण्यार्यैः रजतोत्सवाभिनन्दनभाषणं कृतम् , यस्मिन् भाषणे श्रीमतां कीर्तिशेषाणां पाण्डित्यविमर्श-प्राच्यपाश्चात्यसांप्र-दायिकाधुनिक-मार्गद्वयनिष्ठितानां महामहोपाध्यायप्राचार्य-श्रीकुप्पुस्वामिशास्त्रिणां संस्कृतसेवा, तन्नाम्ना प्रतिष्ठितायाः समित्याः सेवा, तथा श्रीशास्त्रिपादानां शिष्याणां सेवा च वर्णिता । उत्सवाङ्गतया आधुनिकविमर्शकविवरगोष्ठी, पण्डितानां शास्त्रपरिषद् , वैदिकसदस् इति त्रिधा विभज्य आङ्ग्लभाषया संस्कृतेन च विमर्शात्मका निबन्धा वाचिताश्चर्चिताश्च । बहुभ्यो विश्वविद्यालयेभ्यः, तथा नानाप्रान्तेभ्यः संस्कृताध्यापकाः, विमर्शनधुरीणाः, तत्तच्छास्त्रनिष्णाताः, वेदचतुष्टयश्रौतादिकुशलाः पण्डिताश्च आगत्य रजतोत्सवमशोभयन् । कु. शा. स. समित्याः कार्यदर्शिनोः श्री कृ. बालसुब्रह्मण्यार्यस्य, डा० वे. राघवार्यस्य छायाप्रतिकृती समितिकार्यालये स्थापिते । श्रीराघवार्यस्य षष्ट्यब्दपूर्ति-अभिनन्दनग्रन्थोऽपि प्रकाशितः । संस्कृतभाषया निबद्धा गीतगोविन्दादारभ्य ये गेयप्रबन्धाः प्रसिद्धाः, ते संगीतविदुष्या रा. वेदवल्लया गीताः । अन्ते संस्कृतरङ्गनटैः डा. राघवार्यसौत्रधार्ये विशाखदत्तीयं मुद्राराक्षसनाटकमभिनीतम् । समिति-अध्यक्षैः डा. स. राधाकृष्णमहोदयैः स्वकीयपुस्तकसङ्ग्रहस्य भूयान् भागः समितिपुस्तकालयाभिवृद्धये दास्यत इत्यावेदितम् ; एवमेव कीर्तिशेष-श्रीबालसुब्रह्मण्यार्याणां संस्कृत-तःसंबन्धि-

पुस्तकान्यपि दास्यन्त इति निवेदितम् । रजतोत्सवमधिकृत्य ये निबन्धाः प्राप्ताः ते सर्वे समित्याः शोधपत्रिकाया रजतोत्सवविशेषाङ्करूपेण प्रकाशयिष्यन्ते ॥

* ※ *

केन्द्रीयमन्त्रिमण्डले ये पूर्वं शिक्षामन्त्रिण आसन् प्राध्यापक-डा० वी. के. आर्. वि. राव्-महाशयाः तैः संस्कृतप्रेमभरितैः संस्कृत-विश्वसंमेलनं महद् देहल्यां 'यूनेस्को' संस्थासहयोगेन प्रचालनीयमिति संकल्प्य, तद्विषये 'यूनस्को'-अनुमोदनमपि समपादयन् । ते तु अद्य नूतनतया निर्मिते मण्डले यद्यपि न सन्ति, तथापि लोकसभायां वर्तन्ते इति आश्वसिमः । तेषां स्थाने ये सिद्धार्थ राव् नामानः शिक्षामन्त्रिपदमद्यालं-कुर्वन्ति, तेऽपि एवमेव संस्कृतविषये पक्षपातिनस्सन्तः राष्ट्रीयसंस्कृत-परिषत्कार्याणि यथावधेरन् तथानुगृह्णीयुः, सस्कृतविश्वसंमेलनमपि प्रारब्धं निर्वक्ष्यन्तीति विश्वसिमः । तथा च तेभ्यस्संस्कृतसरस्वती स्वाशिषः वितरत्विति प्रार्थयामहे ॥

अयोगयोगः

डा. वे. राघवः

त्वच्चिन्तनावसर एव विलीनवृत्ति
त्वद्भूत एष न हि किञ्चन चेतयेऽहम् ।
तां द्वैतभूमिमतिलङ्घ्य हि वर्त एष
यत्रैव वाक् किमपि वर्णयितुं प्रगल्भा ॥ १ ॥

त्वय्येव मग्नमनसो मम सर्वकालं
यत्सत्यमद्य न हि सङ्गवियोगभेदः ।
द्वैतं प्रवृत्तमधुना वपुरात्मनोर्मे
यत्र क्व वास्तु वपुः-आत्मगृहं त्वमेव ॥ २ ॥

त्वद्दर्शनक्षण उपागत एव नित्य-
मावेशवत् किमपि मां विवशीकरोति ।
कार्यं प्रदेशमपि दुस्त्यजमुद्विहाय
यावन्न तेऽन्तिकमुपैमि, शमो न तावत् ॥ ३ ॥

कार्येषु सत्स्वपि महत्सु सहस्रशो मे
यद्यप्यतीतसमये क्षणमेव वा त्वाम् ।
आलोक्य तीर्थलवपारणयेव चक्षु-
रुज्जीवयामि यदि नो, भवितैतदन्धम् ॥ ४ ॥

अत्युत्तमासु कविवाक्षु च रस्यमाना-
स्वुद्गीतिषु श्रवणयोश्च सुधावहासु ।
लक्ष्मीषु चाक्षि विविधासु विलोभयन्ती-
ष्वप्रीतमस्ति तव चिन्तयदेव चित्तम् ॥ ५ ॥

प्रातस्समागतमतीत्य दिनान्तमत्र
यावत्क्षमं निशि विलम्बितमेव तावत् ।
अद्यापि गेहमभिगन्तुरकाण्ड एव
विच्छिन्नवन्मन इदं परितप्यते मे ॥ ६ ॥

सर्वां क्रियामुपरुणद्धि सदोदितं ते
ध्यानं, कृतो गलितसक्तिरहं परत्र ।
को दोष एष? सकला कृतिरात्मरक्ते-
रात्मा च निर्वृतिमिह त्वयि विन्दतेऽद्य ॥ ७ ॥

सत्यर्क एव दृश ईक्षितुमस्ति शक्ति-
रेवं च ते पुरत एव कृती जनोऽयम् ।
त्वत्सन्निधौ हि परभाग इवास्म्यधिश्रीः
गानं, विना श्रुतिमिवास्मि विना त्वयाऽहम् ॥ ८ ॥

अक्लिष्टमेतदिव ते वदनं कुतोऽन्यद्
द्रक्ष्याम्यसौ परिचयश्च कयाऽन्यया स्यात् ।
शक्या तथापि न मनोविवृतिश्च तत्त-
द्धेतोश्चरामि नियमं ध्रुवमासिधारम् ॥ ९ ॥

आशैव तोषयति तोषयतीह रागा-
भासोऽपि तोषयति चेत्सुनिमित्तमेव ।
साक्षात्तदेव यदि नौ भविता यदाहुः
प्रेमेति, तच्च भविता सखि किं कदापि ॥ १० ॥

आप्रातरानिशि कियन्तमनेहसं त्व-
त्प्रान्तैकवासरसमन्वभवं तदल्पम् ।
नैव स्थितं मयि; बतात्पवियोग एष
शून्यीकरोति हि निरादि निरन्तवन्माम् ॥ ११ ॥

नाद्राक्षमेव कबरीं न च संस्मरामि
किं वा धृतं वसनमाभरणं त्वयेति ।
अद्राक्षमेष विनिमेषकमेकमेव
त्वल्लोचनं यदधुनाप्यहमीक्ष एव ॥ १२ ॥

त्वन्नेत्रलीनकरणः करणं किमन्यत्
कुर्याम्, अहो तनुनि तत्र कियत्यतन्वी ।
लक्ष्मीः, ध्रुवं किमु पुटं किमु पक्ष्म किन्नु
तारां नु वीक्षणकलामुत किन्नु वीक्षे ॥ १३ ॥

ते वीक्षणं परमचार्विति चिन्तितं प्राक्
मन्येऽद्य चारुतरमक्षिनिमीलनं ते ।
लक्ष्मीं नवां प्रतिपदं विवृणोषि काञ्चित्
विस्मारयत्यपि परा सुषमा च पूर्वाम् ॥ १४ ॥

गानं किमर्थमपि संलपनं किमर्थं
योऽत्यद्भुतो मधुरिमास्ति दृशैव लेह्यः ।
कण्ठे सुलेखिनि तवात्र करातिथेये
तच्चर्वणाविरतिरेव न भाविनीव ॥ १५ ॥

एतावदिङ्गितविदां किमु नालमस्मा-
दस्माकमभ्यधिकमक्षममेव किञ्चित् ।
लोकेऽपि काव्य इव सूक्ष्मपथव्रतानां
वाच्यं महद्धि सखि वाच्यनिषेवणं नः ॥ १६ ॥

अस्त्वेवमेव फलबन्धनमन्दमस्म-
त्प्रेमाथवास्तु सुतरां फलवन्ध्यमेव ।
सिद्धेर्बिभेमि कुत एव तदा रसोऽयं
तीव्रो यमेष तनुतेऽस्मदयोगयोगः ॥ १७ ॥

यन्नः प्रियादि सकलं प्रियमात्मनो हि
प्रेष्ठत्वतस्तदिति वेद उवाच मिथ्या ।
आत्मा मम प्रियतमे प्रिय एष नूनं
त्वत्प्रेमपात्रमिति केवलमन्यथा न ॥ १८ ॥

ज्योत्स्नापयःप्रलय आक्रमतेऽद्य लोका-
नन्तर्गृहं कथमवस्थितिरद्य शक्या ।
याते बहिस्तु बहिरुद्गमनाय सज्जाः
प्राणाः, प्रिये तरसि पर्व कथं स्वमेतत् ॥ १९ ॥

श्रद्धातुमेव न हि सुन्दरि हन्त शक्नो-
म्येतत्तवापगमनं, किमितो गतोऽसि ? ।
नातः परं तव विलोकनमप्यवाप्यं !
तच्चिन्तने पविरिवापतितोऽस्ति शीर्षे ॥ २० ॥

त्वत्पारवश्यमियदङ्ग ममेति वेद
नैतान्यहान्यहमितोऽद्य तवापयाने ।
यच्चित्तमप्रतिभमस्फुरणं च गात्रं
तच्चेतना त्वम्, असवस्त्वमभूः स्फुटं मे ॥ २१ ॥

आयाति मङ्गलदिनं समुपैति सन्ध्या
त्वद्दर्शनावसर एति, ततो न जाने ।
मामेति किन्विति; कथं प्रतिवारमायु-
र्गण्डं तमेनमतिजीवितुमुत्सहेऽहम् ॥ २२ ॥

किं मे मनस्त्वयि बभूव निबद्धमेवं
त्वां दृष्टवान् क इव निःशरणो भवेन्न ।
किं त्वामपश्यमथवा समवापि सख्य-
मेतावदप्यनितराप्यमिति प्रमोदे ॥ २३ ॥

त्वत्कारणात्प्रियतमे परितप्य इत्थ-
मित्यन्तरुत्स्फुरति कोऽपि मयि प्रमोदः ।
एतान्विलोक्य च विचिन्त्य च हर्षमेमि
वीराङ्गवत्कशिमपाण्डिमविक्लवान्मे ॥ २४ ॥

भूषापणे कटकमादधती यदा त्व-
मुत्सार्य चेलकमदर्शय एकपादम् ।
श्वेतं कपोतमिव चारु, तदापतद् यद्
भग्नं वपुस्तदधुनापि ममोत्थितं न ॥ २५ ॥

सामान्यमुत्स्फुरति वस्तुषु वीक्ष्यमाणे-
ष्वेकैकमित्यरस एव स तर्कवादः ।
स्त्रीत्युक्त एव भवतीं प्रति धावतो मे
चित्तस्य भान्त्यनुभवास्तु विशेषकाष्ठाः ॥ २६ ॥

विश्लेषपूर्वदिवसे यदपूर्वमङ्गे
क्रूरे प्रसाधनकलां समदर्शयस्त्वम् ।
रक्ताङ्कचेलमणिकङ्कणकादि तत्त-
दन्तर्निहन्ति परितश्चलशल्यवन्माम् ॥ २७ ॥

चन्द्रकलाषोडशी

(प्रथमा)

नल्लान् चक्रवर्ति कृष्णमाचार्यः

चन्द्रे स्वतो नभसि साधु विराजमाने
श्रेयः किमन्यकरदीपवलम्बनेन ।
दोषाकरोऽस्तु सरुगस्तु सुधाकरोऽस्तु
द्रष्टैव तस्य गुणदोषगणान् व्यनक्तु ॥ १ ॥

आह्लादं जनयत्यशेषजगतां शीतैर्मयूखैर्निजैः
सर्वेषामुदरानलं सुमनसां निर्वापयत्यन्वहम् ।
ईशानस्य परिष्करोति हि जटाजूटं सदा चन्द्रमाः
नैकोऽपि प्रसरत्यमुं सुकृतिनं राहोर्मुखाद्रक्षितुम् ॥ २ ॥

क्रूरव्याधयुताटवीषु हरिणस्यात्मावनाशौण्डता-
मुत्पश्यन्ननुकम्पया तमवहत्स्वाङ्केऽविशङ्कं विधुः ।
निह्नुत्यैनमुदन्तमल्पमनसः प्राहुः कलङ्कीति तं
सत्यादप्यतिरिच्यते खलु कथा सत्येतरा विष्टपे ॥ ३ ॥

तारा नाम सुधायते श्रवणयोरिन्दोः, स तारागणे
दाक्षिण्यैकनिधिस्तथाऽप्यसदृशी तासां प्रवृत्तिस्सदा ।
दूरे तस्य भजन्ति कांतिमधिकां पार्श्वे तु हीनप्रभाः
साधुत्वं न हि भामिनीषु रुचिरं पुंसामिति द्योतते ॥ ४ ॥

त्यागेन ह्यमृतत्वमानशुरिति प्राहुस्त्रयीकोविदाः
उक्तिस्सा शतधा यथार्थविषया शीतप्रभामालिनि ।
देवेभ्यः स्वकलाः प्रदाय सकला भोक्तुं पुनर्वृद्धिमान्
चक्षुःपर्वकरोऽहहाऽमृतकरस्संस्तूयते पूरुषैः ॥ ५ ॥

नक्षत्रेश इति श्रुतोऽपि सकलै राजेति संभाव्यते
ख्यातोऽपि द्विजराज इत्यनुदिनं धत्ते सुरापेक्षणम् ।
पारावारसमुद्भवोऽपि भजते गङ्गासमानस्थिति
चित्रैश्चित्रतरैर्विभाति चरितैर्दोषाकरश्रीकरः ॥ ६ ॥

उन्मादे प्रलपन्ति तं विरहिणस्त्वारोप्य दोषान्बहून्
किं छिन्नं शशिनो हृषीकवशिनो यावज्जनाप्यायनम् ।
कुर्वन्नेव हि सञ्चरत्यनुदिनं तच्छ्रेयसस्साक्षिणी
द्वे पश्यन्तु जना दिवोऽभिगमनं नित्यं सुधाधारणम् ॥ ७ ॥

गङ्गासागरसङ्गमात्तजनुषा सानन्दमाराधिताः
मातापित्रनुमोदनार्थमिव तद्धर्माश्च शीतत्विषा ।
देवानाममृतार्पणं प्रतिदिनं वृद्धिक्षयौ पर्वसु
स्वच्छत्वं शिशिरत्वमुत्पलरतिश्शश्वोत्तमाङ्गस्थितिः ॥ ८ ॥

अब्जश्चामृतभानुरम्बुजरिपुश्चांभोजबाणप्रिय-
श्चेन्दुश्चेनसखस्तथेश्वरशिरोभूषेन्दिरासोदरः ।
उत्फुल्लोत्पलनायकोऽप्युडुगणत्रातौषधीडित्यपि
श्लाघापात्रमभूदजादिकलितस्सोमोऽतिसीमोन्नतिः ॥ ९ ॥

पूर्वं सुप्रतिपादितः खलु सुधाभानुस्सुधर्मान्तरे
देवैरेकमुखं कलानिधितयेदानीं स्वतस्सर्वतः ।
प्रादुर्भूय शिरोधिरुह्य विबुधान् सर्वानतिक्राम्यति
किञ्चाद्योऽम्बरलम्बने कृतमतिर्नूत्नोऽम्बराडम्बरे ॥ १० ॥

अम्भोधौ विनिमज्जति प्रतिदिनं पक्षोपवासक्रमः
देवान् संयजते सुधाख्यहविषा, मध्येर्चिषां तापसीम् ।
वृत्तिं गच्छति, भूप्रदक्षिणविधिं निर्वर्तयत्यन्वहं
शीतं मारुतमातपञ्च सहते योगी विधुः कर्मठः ॥ ११ ॥

चन्द्रालोकनमन्तरा कुवलयस्यानन्दहेतुः कुतः
तस्यानुग्रहमन्तरा कथमसून् धत्ते चकोरावलिः ।
तस्याभ्युद्गतिमन्तरा जलनिधेर्गर्भः क्व वा मोदते
तस्याविष्कृतिमन्तरा द्रवति तत्कान्तोपलः केन वा ॥ १२ ॥

लक्ष्मीस्तस्य सहोदरा न चपला रत्नाकरो दर्पणः
दुर्भेदो हरिणस्सखा समगतिस्संपत्सु चापत्सु च ।
व्योमाग्रे गतशृङ्खला च विहृतिस्ताराधिपत्यं विधो-
रेकच्छत्रसमावृतं कमिह तत्साम्यस्पृशं मन्महे ॥ १३ ॥

रामोऽर्कान्वयितल्लजो विधृतवान् चन्द्रं स्वनामाञ्चले
कृष्णश्च स्ववशोद्भव-स्थिति-लयो जज्ञे तदीयान्वये ।
षट्सु प्रत्युत चक्रवर्तिषु हरिश्चन्द्रोऽग्रतो गण्यते
यत्किञ्चिद्विधुसङ्गतिर्जनयति प्राधान्यमुर्वीतले ॥ १४ ॥

सर्वस्मिन् समभाव इत्यभिहितो देवस्सरीसृष्टर्थमुं
लोकं नैकविधं क्वचित्सुखदशा, दुःखप्रवृत्तिः क्वचित् ।
किं न्वेतस्य निदानम्, आम् अवसितं सोमार्कचक्षुष्मतः
पुंसश्शीतलदृग्यतः प्रसरति क्षेमस्ततो वर्धते ॥ १५ ॥

लोकोऽवग्रहनिग्रहोरगमुखे मण्डूकपाकायते
व्यालग्राहवरायतां हिमकरो गारुत्मताश्मायताम् ।
मेघानामिह सञ्चयस्य कलने देवाधिराजायतां
तस्मै तन्तुगुणायतां कृतिरियं जेजीयतां सर्वदा ॥ १६ ॥

कव्यानन्दविधायिनी गुरुमनोहारिण्यघोत्सादनी
कह्लारप्रियदर्शनी बुधहितव्याहारिणी पावनी ।
उच्चैर्मार्गविहारिणी श्रुतिपथारोहिण्यलङ्कारिणी
विश्वक्षेमकृतेऽस्त्वनन्यसदृशी सेयं कलाषोडशी ॥ १७ ॥

(द्वितीया)

चन्द्रं चारुकलानिधिं त्रिजगतां नेत्रं तमोदूरगं
सत्त्वाङ्कं श्रितसौम्यवृत्तिमनिशं सत्संगतिं सौख्यदम् ।
अब्जं त्वभ्युदितं समीक्ष्य जलजं ग्लानिं प्रयातीति यत्
तद् ज्ञातित्वविरोधकारणमिति प्राज्ञैर्विनिश्चीयताम् ॥ १ ॥

राज्ञा देशहिताय वै प्रथमतो निश्शेष्य सर्वं धनं
तस्मादेव करादिसंग्रहणतः कोशः पुनः पूर्यते ।
कंचित्कालमुपाहृतात्मविभवस्सर्वामरेभ्यः पुनः
तत्प्रत्यर्पितसंपदुत्पलसखो राजा कथं नोच्यते ॥ २ ॥

व्योम प्राज्यतरं सरो, हिमकरः पद्मं, मृगो बंभरः
हंसो हंसवरः, सुधा सुमरसो देवालिभिः पीयते ।
मेघाश्शैवलमृक्षसंहतिरपि व्याकीर्णपद्मच्छदाः
एवं साम्यवशाद्विधौ स्मरशरभ्रान्ति वियोगी गतः ॥ ३ ॥

मन्दाक्रान्ता भवति हि कला राहुणा शीतभानोः
प्रागुत्पन्नामृतकवलनापेक्षयेवेति युक्तम् ।
यश्चण्डांशुं तपनमनलाकारमत्तुं यियासुः
केतुस्सोऽयं किमनुमनुते मूढताचिह्नकेतुः ॥ ४ ॥

द्रुतविलंबितमागमनं विधोः
बहुजनादरणस्य निदर्शनम् ।
गमनमेकविधं स्वहितार्थिनः
परहितप्रवणस्य गतिर्द्विधा ॥ ५ ॥

अभिनवमधिचूतमात्तहर्षः
किसलयमत्ति तथाऽपि पुष्पिताग्रम् ।
मनसि विनिहितात्मबन्धुचन्द्र-
व्यसन इवाऽऽतनुते पिकः कुहूक्तिम् ॥ ६ ॥

उपेन्द्रवज्रं न लुठन्ति गोत्राः
उपाम्बुजाक्षं न चरन्ति दैत्याः ।
उपेन्दुचूडं न भवन्ति कामाः
उपेन्दुबिम्बं न सरन्ति तापाः ॥ ७ ॥

स्यादिन्द्रवज्राय नमोऽपरस्मै
तस्मै सुधादीधितये निकामम् ।
यो व्योम नीलोच्छ्रितधारणीध्रं
निर्भिद्य याति प्रतिपक्षमाहो ॥ ८ ॥

पक्षद्वयो वियद्वामी-हरिणाङ्कतया हितः ।
सुधाकरो विरूपश्च साक्षात्तार्क्ष्य इव स्थितः ॥ ९ ॥

पक्षे वलक्षे मधुमक्षिकेव
सुधां प्रदेशे निरुपद्रवे खे ।
संयोज्य पक्षे त्वसिते सुरेभ्यो
ददाति केनाऽप्यनिपात्यमानः ॥ १० ॥

त्यागं पुरो वृद्धिकरं विचख्युः
भोगं तु रोगस्य निदानमाहुः ।
एतद्दृढीकर्तुमिवैति चन्द्रः
वृद्धिक्षयौ तद्द्वितयावसाने ॥ ११ ॥

सभास्तारास्तारापथमधिगता मण्डलहिताः
कविश्शुक्रख्यातिर्गुरुरपि जगच्छस्तधिषणः ।
बुधस्सौम्याभिख्यो भवति युवराट् चन्द्रनृपतेः
ध्रुवाधिष्ठाना सा परिषदविचाल्या शिखरिणी ॥ १२ ॥

राकाचन्द्रे व्योममध्याधिरूढे
लोकास्सर्वे वीतभेदं सहर्षाः ।
के वा न स्युः पूरूषे पूर्णविद्या-
शलिन्युच्चैस्थानगे सम्प्रहृष्टाः ॥ १३ ॥

चाद्रे लोके विहर्तुं दृढतरमधुनाऽन्वेषयन्त्यभ्युपायान्
तेषां सिद्धिः कदा वा कथमथ विहृतिस्तत्र वेत्याक्तशङ्कः ।
सद्योऽहं भावरूढस्मृतिपथगमनश्चन्द्रलोकं समन्तात्
सञ्चर्यालिख्य तांस्तान् बुधगुरुकरुणास्रग्धरोऽहंकरोमि ॥ १४ ॥

आदौ विश्वविराण्मनोऽभिजननं पाथोनिधौ गाहनं
चन्द्राख्याधरणं सुधान्नगिलनं पश्चात्कलोपासनम् ।
ताराणां करपीडनं च दिविषत्संतानसंतोषणं
चक्षुश्श्रोत्ररसायनं विजयतामेतद्धि चन्द्रायणम् ॥ १५ ॥

हिमगिरिशिखराग्रादुत्पतन्तीव गङ्गा
विमलरसतरङ्गा चन्द्रभागानुषङ्गा ।
श्रवणगमनतर्षा प्राप्तसर्वज्ञशीर्षा
लसतु धवलशोभामालिनी षोडशीयम् ॥ १६ ॥

अभीप्सा

राधावल्लभः त्रिपाठी

मधुरमङ्ग भवेन्मम जीवन
विकचपुष्पभरैः समलङ्कृतम् ।
सफलपादपसूल्लसितं यथा
सुरभिलं सुषमावहकाननम् ॥ १ ॥

तरलितः खलु यत्र भवेत्प्रियः
सुभगमोदवहो हि समीरणः ।
प्रणयवारिमयी च वहेच्छुभा
मधुरनादपरा नु नदी सदा ॥ २ ॥

सदैव सन्तोषसुधाभिवर्षणैः
करोति सिक्तां च मनोभुवं हि या ।
विषण्णतां ग्लानिमपाकरोति या
प्रसन्नता सा वनदेवता भवेत् ॥ ३ ॥

आशङ्का च कुतर्कसंशयभयेर्ष्याद्या हि हिंस्राः खलु
यत्र स्युर्न कदापि भैरवगुणा दुष्टाश्च ये जन्तवः ।
सौजन्यं च शमस्तथैव मधुरः प्रेमा ह्यनन्तस्तथा
वासं यत्र समाचरन्ति मुनयः सत्यव्रताः साधवः ॥ ४ ॥

कालुष्यं न भवेत् कदापि खलु यत्सन्दूषयेच्चारुतां
सौन्दर्यं विलसेच्च शाश्वतमहो यत्र प्रमोदान्वितम् ।
तस्मिन् शान्तिमये सुमञ्जुमधुरे लोके हि मे सर्वदा
सर्वाङ्गं विकसेच्च जीवनमिदं पुष्पं मनोज्ञं यथा ॥ ५ ॥

अमरबाला

डा० वि. ए. शर्मा

काऽसि त्वमिन्दुवदने दयनीयमनोज्ञदर्शने ।
शम्पाविलसनवद् दृष्टिपथं क्षणं गताऽन्तर्हिता झडिति ॥ १ ॥

आवहसि दुर्दिनं नो यदा यदा स्मर्यसे मनोनभसि ।
कृत्वा तमोवितानं हृत्वाऽपि दृशं निजप्रभया ॥ २ ॥

निर्जातनामकरणं निरुत्सवं जीवितं त्रुटिप्रायम् ।
त्रुटितं ते पुत्रि हठात् प्रजीर्णमाङ्गल्यतन्तुनिभम् ॥ ३ ॥

जातमृतजन्यशोकादजातजन्यं न दुःसहं दुःखम् ।
नाल्पायुर्मम सन्ततिरिति हा विधिना हतो गर्वः ॥ ४ ॥

अस्ति विषमस्ति चामृतमपि ते संस्पर्शने प्रवालाङ्गि ।
मलयानिल इव, सम्प्रति शेषीभूतो विषस्पर्शः ॥ ५ ॥

अन्तर्हितं यदा ते मम दृक्सन्तर्पणं सुते रूपम् ।
हतहृदयमश्रुतर्पणमपि दातुं न क्षमं शुष्कम् ॥ ६ ॥

यत्र यत्र गताऽसि त्वमितः प्रेत्य कुमारिके ।
शिवास्ते सन्तु पन्थानस्तत्र शान्तिश्च शाश्वती ॥ ७ ॥

रसो वै सः

डा० अर्कसोमयाजी

शिवं विश्वमिदं सर्वं सुन्दरं सुखमन्दिरम् ।
इत्येवं मनुते सर्वो दृष्ट्वेदं जगदद्भुतम् ॥ १ ॥

लिप्समानः सुखं देहं संपोषयितुमिच्छति ।
दिदृक्षमाणो भद्राणि जनो जीवितुमिच्छति ॥ २ ॥

आनन्दं परिपश्यन्ति प्रपञ्चे सर्वतोमुखम् ।
रसो वै स इति प्रोक्तं यथोपनिषदा पुरा ॥ ३ ॥

नो चेत् को वा जनः प्राण्यात् को वा संसारमिच्छति ।
आशापाशो हि बध्नाति जनान् जीवितवर्त्मनि ॥ ४ ॥

आनन्दं सुवतेऽस्मभ्यं फलपूर्णा महीरुहाः ।
आनन्दं सुवते तद्वत् लतान्तैर्ललिता लताः ॥ ५ ॥

पर्वताश्च तथा मेघाः नद्यो मलयमारुतः ।
आनन्दं जीवितेऽस्मभ्यं तनुते हि दिने दिने ॥ ६ ॥

सन्तोषो जायतेऽजस्रं दृष्टं चेद्वस्तु सुन्दरम् ।
स्वाद्यमानं च सौन्दर्यं वृद्धिं याति दिने दिने ॥ ७ ॥

नैव तत्सुन्दरं वस्तु हृदयादस्तमेष्यति ।
स्वप्नान् सुमधुरानेतान् प्रसूते ध्यायतो हृदि ॥ ८ ॥

तदर्थं जीवितं याति नित्यमानन्दमन्दिरम् ।
जाग्रतस्स्वपतो वापि तदानन्दो भवेत् सदा ॥ ९ ॥

आनन्दकन्दमेतत् स्यात् जीवितं कस्यचित् कृते ।
पत्युः कृते नवोढायाः प्रसूतायास्सुतस्य च ॥ १० ॥

केचित् केचित् जनं सर्वं जाया वा पुत्रपुत्रिकाः ।
अन्ये वा प्रतिबध्नन्ति जीवितं सुखकामुकम् ॥ ११ ॥

कानिचित् वस्तुजातानि केचिद् भावाश्च जीविते ।
कुर्वते जीविनोऽजस्रमानन्दरसवाहिनीम् ॥ १२ ॥

कष्टान्यापद्यमानं च पीड्यमानं रुजापि च ।
पाशायमाना बध्नाति काचिदाशा जनं क्षितौ ॥ १३ ॥

श्वो भवेन्मे महत् सौख्यं विन्देयं बहुसम्पदः ।
इत्येवं मन्यमानेन जीवितं याप्यते क्षितौ ॥ १४ ॥

वृद्धो वापि च रुग्णो वा दरिद्रो वा भवन् नरः ।
कञ्चिदानन्दमुद्दिश्य न जहाति स्वयं तनुम् ॥ १५ ॥

कीदृक् सौन्दर्यमत्रास्ते लोके मधुरिमा यतः ।
निर्वक्तुं न समर्थोऽपि जीविताशां जहाति न ॥ १६ ॥

कुतोऽपि जननं स्वस्य कुत्रापि विलयं तथा ।
अजानन्नेव लोकेऽस्मिन् जीविताशां तितांसति ॥ १७ ॥

का मे पत्नी सुतः को वा कौ वा मे पितराविति ।
अजानानो बरीभर्ति व्यामोहं तेषु दुर्भरम् ॥ १८ ॥

मनोरथः

डा० वे. राघवः

उपर्युपर्युदञ्चते
मनोरथो मनोहरः ।
क्षणेन बुद्बुदप्रभं
तथा तथा विलीयते ॥ १ ॥

स स स्फुरन्नितस्ततो
मनोवनान्तसीमसु ।
कुरङ्गपोतसुन्दरं
भ्रमत्यहो ममाशयः ॥ २ ॥

दिनान्तमल्लिकेव मे
मतिर्विकस्वरा क्षणम् ।
सगन्धलक्ष्मि राजते
विशीर्यते क्षणादहो ॥ ३ ॥

रुचिररुचिश्च

डा० वे. राघवः

यमेव यामेव तथा तथैकदा
स्तुवन्प्रपश्यन्नुपगूहते नरः ।
तमेव तामेव स एव चान्यदा
विनिन्द्य तद्दृष्टयसहोऽपगच्छति ॥ १ ॥

गते दिने यत्र मुखाम्बुजे दृशा-
वमाद्यतां तद्विषमद्य भासते ।
कुतोऽपि तत्रैव मुखे समुन्मिषेत्
पुनर्मनोमोहनकान्तिधोरणी ॥ २ ॥

तनौ तनौ दोषगुणौ विमिश्रितौ
विकारशोभे च तथैव तद्वशात् ।
कदापि शोभैव विशिष्य तन्मुखे
विकार एव प्रथते कदाचन ॥ ३ ॥

इति प्रधानांशविवर्तहेतुना
वशीकृतो वा विरसीकृतोऽथवा ।
यमेव यामेव जिहासति स्म भोः
तमेव तामेव दिदृक्षतेऽधुना ॥ ४ ॥

सम्मार्जनीसंस्तवः

जग्गू शिङ्गरार्यः

सम्मार्जनि! त्वां भुवनोपकर्त्रीमनादरात्केऽप्यवधीरयन्तु ।
गृहाङ्गणे धूलिकणावृते त्वां संभावयन्त्येव जनास्त एव ॥ १ ॥

प्राप्ते प्रभातावसरे शयानाः स्त्रियस्समुत्थाय तदैव गेहे ।
त्यक्त्वान्यकार्यं प्रथमं भवत्यास्साह्याद्गृहान्तः परिशोधयन्ति ॥ २ ॥

राज्ञां गृहे देवगृहे च गोष्ठे महानसे पर्णगृहे मठे वा ।
नृणां निवासार्हसमस्तदेशे व्याप्तिस्तवास्ते त्वमतोऽसि पूज्या ॥ ३ ॥

अशुद्धदेशस्स तु शुद्धदेशोऽस्त्यसाविति त्वं सहजं प्रभेदम् ।
अपास्य सर्वत्रसमानरीत्या बहिस्थलं देवगृहानुपास्से ॥ ४ ॥

वनान्तभूम्यामपि पर्वताग्रे पवित्रदेशे जननं भवत्याः ।
तस्माज्जनस्त्वां गृहशुद्धिकार्यं सदोपयुङ्क्ते हि निसर्गपूताम् ॥ ५ ॥

उपनयनविवाहाद्युत्सवानां प्रसङ्गे
सदसि जनगणानामागमे च प्रसक्ते ।
प्रथममयि! भवत्यां तत्स्थले सञ्चरन्त्यां
भवति हि परिशुद्धा गेहभूमिर्जनार्हा ॥ ६ ॥

बाल्ये शिशूनां यदि दृष्टिदोषास्स्याद्वा तदानीं तव देहकाण्डम् ।
किञ्चित् गृहीत्वाऽग्निशिखाप्रदीप्तं नीराजयन्त्याशु च दोषशान्त्यै ॥ ७ ॥

भूतादिदुष्टग्रहपीडितानां नृणां विपन्मोचनकर्मसक्ते ।
व्यर्थप्रयोगे सति मान्त्रिकेऽपि त्वां वीक्ष्य धावन्त्यथ भीतभूताः ॥ ८ ॥

त्वां सूतिकागेहसमीपदेशे दूतीमिवाचारविदो निवेश्य ।
अर्चन्ति धूपैश्शिशुरक्षणार्थं तव प्रभावस्सुमहान् चकास्ति ॥ ९ ॥

नैसर्गिकं ते सुदृढैकमत्यं स्वजातिसंश्लेषपरासि तस्मात् ।
तं सद्गुणं बोधयितुं पदार्थानेकीकरोष्याशु भुवि प्रकीर्णान् ॥ १० ॥

शैत्याधिक्यादार्द्रकाष्ठोपयोगाज्जातं वह्नेर्मान्द्यमाहर्तुकामाः ।
त्वामेवाग्नौ ज्वालयित्वातिशीघ्रं पाकोद्योगं पूरयन्त्येव नार्यः ॥ ११ ॥

धान्यानां परिभर्जनप्रकरणे सम्मार्जनि त्वां जनः
कृत्वाधोमुखनम्रशीर्षशिखरां भाण्डेऽग्निदग्धे मुहुः ।
सञ्चार्यातिसुतापतप्ततनुमप्युच्चैः परिभ्रामय-
न्त्येवं लोकहिताय ताम्यसि सदा नोपेक्षणार्हास्यतः ॥ १२ ॥

दीपप्रज्वलनाय किञ्च तिलकं वक्त्रे निवेष्टुं तथा
कर्तुं भोजनपत्रसीवनमथो दन्तस्य निर्घर्षणम् ।
कर्तुं भेषजलेपनं रचयितुं सम्मार्जनि प्रायशः
त्वद्गात्रावयवः प्रयोजनकरो लोकस्य नानाविधैः ॥ १३ ॥

क्षेत्रे गृहे धान्यकणान् प्रकीर्णानास्वादनेच्छारहितैव तावत्[1] ।
राशीकरोष्याशु गुणांस्तवैतान् श्लाघ्यान् सदैवानुसरन्तु लोकाः ॥ १४ ॥

गृहे रुषान्धैर्गृहिभिः प्रसक्ते भयङ्करे दुष्कलहेऽनिवार्ये ।
तदा त्वयाताड्य परस्परं ते स्वकोपशान्तिं क्रमशो लभन्ते ॥ १५ ॥

अनेकपादप्रकरावृतापि गृहस्य कोणे क्वचिदेव लीना ।
अन्यैर्गृहीता च करेण भूम्यां संचारितैवाटसि वालिकेव ॥ १६ ॥

नान्ने तवेच्छा न च वाससीच्छा शय्यासु नेच्छा न च भूषणेच्छा ।
परं त्ववश्यं बत वाञ्छसि त्वं निरन्तरं तत्कटिसूत्रमेकम् ॥ १७ ॥

सुसूक्ष्मपादाग्रशिलीमुखांस्त्वं नृणां पटान्तर्ननु संप्रयुज्य ।
तान् बाधमाना निजकोपवेगमेवं जनानां प्रकटीकरोषि ॥ १८ ॥

शूर्पैः पतिस्तेऽतिपतिव्रतासि सम्मार्जनि त्वं भुवि सञ्चरन्ती ।
संपादितं सर्वमपि प्रियाय प्रयच्छसि स्वार्थमपास्य हन्त ॥ १९ ॥

लोकोपयोगतनुयष्टिरसि स्वतस्त्वं
सर्वेषु गेहनिवहेष्वनिवार्यवासा ।
एवं स्थितेऽपि सुलभक्रयमात्रलभ्या
सम्मार्जनि ! प्रथितकीर्तिमती विभासि ॥ २० ॥

---

१. साकल्येनेत्यर्थः ।

बहुविधलोकोपकृतिं कृत्वाप्येवं न तेऽवलेपोऽस्ति ।
किमपि त्वं प्रतिफलमपि नेच्छसि किमिदं तवाद्भुतं चरितम् ॥ २१ ॥

रीढातिरूढा भुवि ते कुतो वा गूढान् गुणौघांस्तव न स्मरन्ति ।
लीढासि दोषाल्पमलेन नापि बाढं हि मूढास्त्वयि साभ्यसूयाः ॥ २२ ॥

उपकारपरंपरां विधात्र्यास्तव सिद्धं बहुमानमेतदेव ।
तव दर्शनमप्यमङ्गलं खल्विति लोके विबुधाश्च मन्वते यत् ॥ २३ ॥

मुञ्च मुञ्च हृदि सञ्चितां चिरात् गर्हितास्मि सकलैरिति व्यथाम् ।
शोधिनि ! प्रकृतिसिद्धमेव तत् साधुगर्हणमिदं न नूतनम् ॥ २४ ॥

प्रयोजनाधिक्यमहत्त्वयुक्तेऽप्यवश्यकत्वेऽपि पदार्थसङ्घे ।
सौलभ्यदोषेण न मान्यतास्ति सम्मार्जनि ! त्वं भवसीदृशी हि ॥ २५ ॥

सम्मार्जन्यास्सद्गुणान् श्लाघनीयानभ्यस्यन्तु स्वार्थनिष्ठा मनुष्याः ।
अन्तर्यामी चित्यचित्यप्यजस्रं यस्स श्रीशस्साधुतां नश्चिनोतु ॥ २६ ॥

कोऽयं कालः किमपि च तमः

सुखमय मुखर्जी

कालो बलीयानिति मूढबुद्धे-
र्बुद्धस्य नेयं गणना हृदि स्थिता ।
तमस्तमोऽन्धो बहुमन्यतेऽयं
संपश्यतः पश्य कुतो विडम्बना ॥ १ ॥

बलं बलं चोरयतः परस्य
यस्येह नास्ति क्वचन स्वतन्त्रता ।
तं हीनवृत्तं कपटं परीक्ष्य
बिभेति को दास्यरतिं विना जनः ॥ २ ॥

भयं भयाकारमतत्स्वरूपं
यद्बाधते देहभृतोऽतिमात्रकम् ।
चित्रात् किमन्यत् किल बालकाना-
मसौ चलच्चित्रसमर्पितादिव ॥ ३ ॥

एकं यदा मोहनमिन्द्रजालं
संमोहनास्त्रं पुनरन्यदाहितम् ।
तत्रापि भूयो मदविह्वलत्व-
महो तमोराशिरयं सुदुस्तरः ॥ ४ ॥

नमोऽस्तु चन्द्रायतदर्शनाय
शूराय कस्मैचिदनन्यशक्तये ।
यो दृष्टिमात्रेण तमो विधूय
कालातिगे व्योम्नि विराजते स्थिरः ॥ ५ ॥

जागर्ति पुरुषः

सु. मुखर्जी

लोकस्य सर्गस्थितिनाशहेतु-
रमोघशक्तिर्ननु सोऽहमीशः ।
इति क्षणादेव तमो विधूय
जागर्ति भूयः पुरुषः प्रतीतः ॥ ६ ॥

उत्थाय तेजोभिरसौ सलीलं
यावत् स्थितः स्वां प्रकृतिं प्रपन्नः ।
विलीयते तावदमुष्य दूरं
सङ्कल्पमात्रेण महारिवर्गः ॥ ७ ॥

स्वातन्त्र्यमाश्रित्य परं प्ररूढः
स कल्पवृक्षः फलति क्रमेण ।
अधःक्रियन्ते मधुमन्ति यत्र
सुदुश्चराणां तपसां फलानि ॥ ८ ॥

कालः परमदुस्तरः

सु. मुखर्जी

चित्रायते जगदिदं यदि चित्रवृत्तं
कालाभिधः कथमसौ प्रभवेन्न तावत् ।
यस्तेजसाखिलहरेण निजेन दृप्त-
स्तूष्णीं बिभाति क इवाप्रतिलङ्घ्यवीर्यः ॥ ९ ॥

आत्मा महान् स विशदेषु सदा प्रतीतः
कालः पुनः कुटिलविभ्रमदुर्निरीक्ष्यः ।
आत्मानमाश्रय तमात्मनि भासमानं
कालं जिगीषुरसदिन्द्रियदास्यहेतुम् ॥ १० ॥

कालाय नन्विह नमोऽस्तु भयानकाय
कालस्य यः कलयिताथ शिवाय तस्मै ।
कालेन कालमविजित्य महाबलेन
स्वास्थ्यं कियत्तव दुरन्तविकारभाजः ॥ ११ ॥

शक्तिः प्रभवति

सु. मुखर्जी

शक्तिः परं प्रभवति प्रतिबाधितुं चेत्
कस्मादियं न शरणीक्रियते यथावत् ।
सोपायसिद्धिषु पराङ्मुखवृत्तिभाजां
किं मौढ्यमायतमहो तमसावृतानाम् ॥ १२ ॥

आत्मेच्छयैव ननु केवलयाप्रमत्तो
लब्धात्मशक्तिरजितो विजयेत शत्रून् ।
किं निर्जितोऽपि मुहुरेभिरसत्प्रवृत्तैः
क्लैब्यं न मुञ्चसि चिराय दुरन्तपारम् ॥ १३ ॥

निद्रां जहि प्रसभमात्मनि सम्प्रबुध्य
नन्वात्मनैव कुशलार्थितया क्षणेन ।
उत्तिष्ठ तिष्ठ युधि दर्शितसर्वगात्रः
शक्त्यैव जेष्यसि रिपून् खलु युध्यमानः ॥ १४ ॥

महाकविः कण्टकः

राधावल्लभः त्रिपाठी

प्रथमः खण्डः

(१)

महाकविना कण्टकेन सह मे प्रथमसाक्षात्कारः वर्षद्वयात् प्राक् सञ्जातः। तस्मिन् समये नाहमजानां यत् कस्याश्चनाप्रतिमायाः विभूतेः अनुपमस्य वा महापुरुषस्य दर्शनलाभः मया प्राप्यते इति। कथमिव जानीयान्मादृशोऽज्ञो जन इदम्? एकदा अहं स्वगृहे स्थितः पुस्तकमेकमधीयान आसम्। सहसाऽनर्गलद्वारमुद्घाट्य झटिति जवनिकामपसार्यान्तःप्रविश्य महाकविः मत्समक्षं काष्ठोपवेशिन्यौमुपाविशत्। महाकवेः दर्शनसौख्यं तावद् दूरे तिष्ठतु, तत्कालं यावदस्य कीर्त्तिकथापि मन्दभाग्यस्य मे कर्णगोचरीभूता नासीत्। तस्य वदनगतं निर्वेदभावं वीक्ष्यासीन्मे चेतसि यदहं नूनं श्रीमद्भगवद्गीतायां वर्णितं स्थितप्रज्ञपुरुषं कमपि प्रत्यक्षीकरोमीति। कार्पासोत्तरीयेनाधोवस्त्रेण चाच्छादितम् अतीव कृशं त्वगस्थिभूतं देहम, स्फटिकशिलेव सुचिक्कणं पलितकेशं शिरः, लघुललाटस्याधः सुविशालगर्तयोरन्तःस्थिते उलूकस्य इव गोलाकृतिनी नेत्रे, मध्यमवयस्येव निरन्तरवलिभिराक्रान्तं, सततताम्बूलचर्वणेन दृश्यमानपीतकृष्णदन्तपङ्क्ति व्यक्तजत्रुमुखमण्डलं च।

स्वरूपसुधामायतनयनपुटाभ्यामापिबन्तमिव, सहसैव स्वदर्शनेनाप्रतिभमिव, ससम्भ्रमाक्षिप्तहृदयमिव, मूकमिव, विस्मृतभाषणमिव मामुपवीक्ष्यासौ महात्मा भक्तवत्सल इव परमदयालुतया अतीव रहस्यमयगहनया लज्जितवायुयानगमननिनादया वाण्याऽवादीत्-"श्रीमन्तः, अहं कविरस्मि। संस्कृतभाषायां कविताः लिखामि। साहित्यजगत्यहं 'महाकविः कण्टक' इति नाम्ना प्रख्यातोऽस्मि। (स्वकीयोलूकनेत्रपुटे विस्तारयन्) मम वास्तविकनाम तु 'लक्ष्मीप्रसाद' इति आसीत्। किन्तु महाभाग! यः लक्ष्मीप्रसादनामा पुरा अभवत् स तु मृतः। यदियमाकृतिर्भवतां पुरतः स्थिता सा महाकवेः कण्टकस्य आत्मा एव।"

एतादृशमद्भुतमुपन्यासं निशम्याहं वराकः विमूढ इव महाकवेः ओजप्रदीप्तमाननं निभालयन् स्थितः। "जानात्येव भवान् यत् परमकठिनं

---

१. 'कुर्सी' इति भाषायाम्।

कविकर्म भवति । कविः समाजस्याग्रदूतः नेता च भवति । तथापि कविकर्त्तव्यं पाल्यत एव मया । कविना नवयूनां सम्पर्के अवश्यमागन्तव्यम् । भवदीयमहाविद्यालये प्राध्यापकेन मम शिष्येण पाटिलेन कथितं यद् भवान् उत्साहसंपन्नो मेधावी तरुणः सद्य एव आचार्यपदेऽस्मिन् महाविद्यालये नियुक्तः अस्मन्नगरमागतः इति । अतो भवद्दर्शनायागतोऽस्मि" । सः पुनरवदत् ।

अहं बद्धाञ्जलिः सविनयमवदम्—"भगवन्! कृतार्थोऽस्मि धन्योऽस्मि सुरभारतीप्रणयजुषां महाकवीनामत्रमवतां भवतां दर्शनेन" इति ।

ततः प्रीतमना महाकविरपृच्छत्—"कल्लोलमासिकपत्रस्य कतिचनाङ्कास्तु भवद्भिरवलोकिता एव स्युः?"

"भगवन्! न मे दृष्टिपथमागतः कल्लोलमासिकस्याङ्कः कोऽपि । पत्रस्यास्य नामाप्यश्रुतपूर्वं मया ।"

"अये! संस्कृतशिक्षकोऽपि भवान् कल्लोलमासिकविषये नैव जानाति! पुराऽस्मादेव नगरात् पत्रमिदं प्रकाश्यते स्म । अथ तस्य सम्पादकमहाशयः पञ्चत्वमुपगतोऽतः पत्रस्य प्रकाशनं समाप्तम् । तस्मिन्नेव कतिपयाः मम रचनाः प्रकाशिताः । सम्पादकमहाशयेनाहं भृशमादृतोऽभूवम ।"

"मन्दभाग्योऽहं, कवीश्वराः! यद् भवत्काव्यामृतरसास्वादाद् वञ्चितः। किन्तु सम्प्रति भवत्परिचयेन इदं सुखं लप्स्ये इत्याशासे ।"

"अहो भवांस्तु गुणग्राही साहित्यानुरागी प्रतिभाति । अत्रत्याः जनास्तु सर्वे मूर्खाः अज्ञानान्धाः । कथं ते जानीयुः किं काव्यं का वा कवेः प्रभुतेति? अथ यदि कुतूहलं तर्हि एकां रचनां श्रावयामि ।"

"गृहीतः क्षणः । श्रावयतु भवान् ।"

महाकविः 'हँह् हँह्' इति रवेण गलनलं स्वच्छीकृत्य तयैव गहन-गम्भीरवाण्या व्याजहार-एषा कविता कल्लोलेऽपि प्रकाशिता । अस्मिन् मया दुर्गादेव्याः भावनामयशब्दैः संस्तुतिः कृता । पश्यतु भवान्—

"चूर्णीकृत्य रणे हि या मदयुतं शुम्भं निशुम्भं तथा
दुष्टांश्चासुरराक्षसान् हतवती देवी विमर्दप्रिया ।
यस्या एव बलेन देवमनुजाः प्राप्ताः प्रसादं परं
दुष्टानां दलिनीं च शान्तसुमुखीं दुर्गां नमामो वयम् ॥"

"हंहो कविवर! अतीव सरसा भवतां कविता! अनुप्रासानामपूर्वच्छटाऽत्र राजते ।"

महाकविः प्रशंसामिमामाकर्ण्य अमन्दानन्दगद्गदहृदयः अशेषामेव कवितां श्रावयितुं प्रवृत्तः । अहं तावद् देवीदेवतादिषु नैव विश्वसिमि । अतो महाकवेः नामानुरूपा सा कविता मे नीरसनीरसा एव प्रतीताऽभवत् । किन्तु कविता सा अतीव विशाला आसीत् । श्रावं श्रावमहमचिन्तयम्-"अहो कदाऽयं महानुभावः स्वविरहपर्युत्सुकं करिष्यति मे चेतः!" अत्रान्तरे एव—

"अये गुरुवर्य! कथं स्वसत्काव्यपाठेन पीडयस्येनं महाभागम्?" इत्युच्चस्वरेण कथयन् मे सुहृद् पाटिलमहाशयस्तत्र सहसा प्रविवेश । महाकविः पाटिलं वीक्ष्य सहसा विवर्णवदनोऽभवत् । पाटिलस्तमवलोक्य मुक्तहास्यं विदधे । महाकविः संसभ्रममाह—"अरे पाटिल! कथं भवानत्रायातः । मदीयकविताश्रवणेन सरसतायाः सागरे निमग्नहृदयोऽयं सहृदयो महाभागः । अतो भवता विघ्नः नैव कार्यः ।"

"भवदीयकविताश्रवणेन नीरसताया महासागरे मग्नोऽयं महाभागः । पश्यतु भवान्—सर्वथा क्लान्तं दृश्यतेऽस्य वदनम् । एतेन ज्ञायते यद् होराद्वयं काव्यं शृण्वतोऽस्य व्यतीतम् । अतो भवता अन्यः कोऽपि धीरः श्रोता अन्वेष्टव्यः ।"

"पाटिल! जानाम्यहं यन्मदीयकवितायाः श्रोतारस्तावद्दुर्लभाः । कथं 'नक्काराणां' घोषे तूर्यरवं कोऽपि शृणोतु? किन्तु भवान् मम शिष्यो भूत्वाऽपि तृणाय मनुते माम्! अहो कृतघ्नता भवतः! । यस्मिन् पत्रपुटे खाद्यते तस्मिन् एव छिद्रं क्रियते । अहो अद्यतनशिष्याणां निरङ्कुशता! एते एव शिक्षकाः भूत्वा अपरेषां छात्राणां चरित्रं विनाशयन्ति । दुर्गे! का गतिरस्यार्यावर्तस्य भविष्यति!" इत्युदघोषयत्;

"आस्यतां भोः कविवर! न गम्यताम्"—इति वदन्तं मामप्यनादृत्य महाकविः सत्वरं ततो विनिर्गतः ।

गते तस्मिन् पाटिलमहाशयः साट्टहासमपृच्छत्—"कथं भवानस्य महाकवेः जाले तिपतितः?"

"मित्र! भवानेवात्र कारणम् ।"

"कथमहम्? अहो स्मर्यतेऽधुना । ह्यः एव गुरुदेवः मार्गे मिलितः । वार्तालापावसरे तेनाहं पृष्टः—चतुर्वेदिमहाशयस्य स्थाने कोऽन्यः संस्कृतविभागे महाविद्यालयमागतः?" इति । मया तदा भवतां परिचयो निवेदितः । अत एव स महापुरुषोऽत्रागतो भवेत् । भवतु, शोभनमेवैतत् जातम । गुरुदेवोऽस्मिन् नगरे महत्तमा व्यक्तिः । एतादृशेन महाकविना सहावश्यमेव भवद्भिः परिचयः संवर्धनीयः । हः हः!

मया पृष्टः सः महाकवेर्जीवनवृत्तान्तमकथयत् । महाकवेः पिता पुरा एकस्मिन् समीपवर्तिग्रामे पाण्डित्यवृत्तिमकरोत् । प्राथमिकशिक्षां स्वग्रामे प्राप्यासावस्मन्नगरमागतः । सः आङ्ग्लशासनस्य समयः आसीत् । अत्रत्या राजानः विमलसिंहदेवाः संस्कृतपाठशालामेकां चालयन्ति स्म । तत्र पठन् महाकविः यथाकथञ्चित् शास्त्रिपरीक्षां तृतीयश्रेण्यां उत्तीर्य तत्रैव अध्यापकोऽभवत् । किन्तु गच्छता कालेन तस्याचरितैः क्रुद्धेन विमलसिंहदेवेन निलम्बितो भृत्याः । तथापि सोऽस्मिन्नेव नगरे वसतिमकरोत् । तस्य पितुरनेके यजमानाः अत्र आसन् । अयं तेषां गृहेषु कदाचित् सत्यनारायणकथां श्रावयित्वा कदाचित् तांस्तान् जपहोमादिकान् सम्पादयित्वा स्वर्गलोकस्य यात्रापत्रं[२] तेभ्यो वितरन्निव महद्धनमुपार्जयत् । विवाहस्तस्य बाल्ये एव जात आसीत् । अत्र निवसतोऽस्य तिस्रः कन्याः पञ्च पुत्राश्चोत्पन्नाः । सम्प्रति कन्यास्तु परिणीताः बहिर्निवसन्ति । पुत्राश्चात्रैव सन्ति । अस्य ज्येष्ठपुत्रश्चतुर्दशवर्षदेशीयः अस्ति ।

एतं वृत्तान्तं निशम्य अहं पाटिलमहोदयमपृच्छम्—"किन्तु महाकविस्तु कथयति स्म यद्भवान् तस्य शिष्यः इति । तत्कथम्?"

---

२. 'टिकट्' इत्याङ्ग्लभाषायाम् ।

"यदा अहं बी० ए०—कक्षायामपठं तदा मया तस्य श्रीचरणयोः संस्कृतभाषाया अध्ययनं कृतम् । न जाने कया प्रेरणया बी० ए० - कक्षाया-मध्ययनाय संस्कृतभाषा मया स्वीकृता । देवानां सा भाषा कथं मादृशमानुषाणां बुद्धिगम्या स्यात्? दौर्भाग्येन तदानीमस्मिन् महाविद्यालये संस्कृतशिक्षणस्य कापि व्यवस्था नासीत् । नगरे अन्यः कोऽपि संस्कृतज्ञो नावर्तत । अतः स्वपित्रा प्रेरितोऽहं द्वित्रिसहाध्यायिभिः सह (अध्ययनव्यपदेशेन मनोरञ्जनाय) महाकवेः गृहमगच्छम् । सोऽस्मान् अध्यापनकाले प्रायशः स्वरचितकाव्यान्येव श्रावयति स्म । मह्यं सोऽतीवाकुप्यत् यतोऽहं सदैव तं व्यङ्ग्यबाणैरपीडयम् । यस्य विकरालक्रोधज्वालोद्दीपनाय कदाचिन्मे मित्राणि कथयन्ति स्म— गुरुदेव! ह्यः अयं पाटिलः चित्रपटदर्शनाय गतवान्" इति ।

तदा गुरुदेवः रुषा अक्षिपुत्तलिके नर्तयन् कथयति—"रे मूर्ख! मया पुनः पुनः प्रबोधितोऽपि त्वमेतादृशमनोरञ्जनेषु समयमतिवाहयसि? ते पिता मम सुहृदस्ति अतोऽहं त्वां शिक्षयामि तव हितार्थं च वदामि । यदि त्वं मदनुशासने नैव तिष्ठसि चेत्....."

'"प्रसीद प्रसीद प्रभो!", अहं भणामि, "नाहं मनोरञ्जनार्थं चित्रपटदर्शनाय गतवान् । वस्तुतः दुर्गादेवीमधिकृत्यैकं धार्मिकचित्रं द्रष्टुमहं गत आसम् ।"

'"भवतु भवतु ।" गुरुदेवः किञ्चित् तुष्टः कथयति—"तथापि विद्यार्थिजीवने त्वया अध्ययने श्रमः कार्यः । नैव जानासि त्वं कथमिव दुर्बोधं जीवनमस्ति मानवस्य । पश्य, 'हेम् लेट्' नामकेनाङ्ग्लकविना 'षेक्स्पियर्' नाम्नि महाकाव्ये लिखितम्—"लाइफ् इस् बट् ए वाकिंग् षेडो ए टेल् टोल्ड बै एन ईडियट्....." इति ।

'"अये गुरुदेव!" मध्ये एव आङ्ग्लसाहित्यविद्यार्थी गोपालो गुरुदेवं निवार्य कथयति—"भवतां स्मृतिर्विपर्यस्ता किञ्चिदत्र । 'हेम्लेट्' नामकस्तु कोऽपि कविर्नैव बभूवाङ्ग्लसाहित्ये । 'षेक्स्पियर्' नामा बभूव किल । तेन 'मेक्बेथ्'नाम्नि नाटके लिखितम्—'

''"अरे पाटच्चर! किं त्वं तृणाय मन्यसे माम्? मया आङ्ग्ल-साहित्यस्यैतावद्ग्रहनमध्ययनं कृतं यद्विस्मरणं तु स्वाभाविकमेव। त्वया तु गुरुवचने श्रद्धा कार्या 'श्रद्धावान् लभते ज्ञानम्—'

अहं कथयामि—गुरुदेव! अयं गोपालः पलाण्डुयुक्तं भोजनं करोति। अतोऽस्य मतिर्भ्रष्टा खलु।"

तदा गुरुदेवः सात्त्विकभोजनस्यात्मन उदाहरणपुरस्सरं महत्त्वं प्रतिपादयन् घटिकाद्वयं यावत् भाषणं करोति। ततश्च कथयति—"अद्य युष्माभिस्तादृशं प्रकरणमुपस्थापितं यदहं किमपि पाठयितुं न अशक्तुवम्। अद्य गम्यताम्। श्वः अध्यापने विघ्नः नैव कार्यः।"

"एवं संस्कृतमधीयानोऽहं बी० ए० - परीक्षायां संस्कृतप्रश्नपत्रेषु यथा-कथञ्चित् तृतीयश्रेण्या अङ्कानुपलब्धवान्।" इत्युक्त्वा पाटिलमहोदयः तूष्णीं स्थितः।

अहमपृच्छम्- "अपि भवान् 'कल्लोल'-संस्कृतमासिकविषये जानाति किमपि?"

"आम्। पुरा अत्र रामप्रसादशर्मनामानः वयोवृद्धसंस्कृतज्ञाः न्यवसन्। अर्थाभावादिविविधबाधासु विद्यमानास्वपि संस्कृतसेवाव्रतिनस्ते यथा-कथञ्चिन्महता आयासेन एतन्मासिकं स्वसम्पादकत्वे प्रकाशयन्ति स्म। तस्मिन् काले महाकविरत्र मध्यमायां कक्षायां पठति स्म। कवितां प्रति तस्य महोत्साहं वीक्ष्य सम्पादकमहोदयैस्तस्यैका कविता कदाचित् प्रकाश्यतां नीता स्वपत्रे। तस्मादयं स्वात्मानं संस्कृतस्याद्वितीयं कविं मनुते। अथ सम्पादकमहोदया-स्तपस्विनः पत्रप्रकाशनारम्भसमयात् सप्तमासोपरान्तमेव परलोकं प्रयाताः। अतः पत्रप्रकाशनं स्थगितमभवत्। इयं घटना विंशवर्षपुरातनी वर्तते।"

(२)

तस्मिन् दिने शाकक्रयार्थं गतोऽहमापणे महाकविं दृष्टवान्। सः कस्याश्चित् शाकविक्रेत्र्याः हट्टात् किमपि क्रीणाति स्म। तं दृष्ट्वाऽहं तस्मै नमस्कृतिं न्यवेदयमपृच्छम् च-"किमिदं क्रीयते भगवन्?"

"अरे एतत् ताम्रभण्टाकीफलं[3] क्रीणामि तावत् । इदं भृशं रोचते मह्यम् ।" इत्युक्त्वा स्कन्धन्यस्ताङ्गप्रौञ्छनवस्त्रं[4] भवतार्या विक्रेत्र्या तुलातः फलान्यादाय तस्मिन् वस्त्रे तानि संस्थाप्य पोट्टलिकामबध्नात् । ततः विक्रेत्र्यै तेषां मूल्यमददात् ।

"अरे महाराज ! पञ्चानामाणकानां स्थाने कथं चत्वारि एव दत्तानि?" सा आणकानि गणयित्वा अवदत् ।

"अये पश्यतु भवानस्याः कुटिलताम् !" अकथयत् महाकविः—"कथं भवन्ति पञ्च आणकानि ?"

"आः कथमिव अन्याय्यं क्रियते ? किं न मया प्रागेव भवान् शब्दापितः—"दशभिराणकैः 'किलो'-मात्राणि ताम्रभण्टाकीफलानि मिलन्ति इति?"

"त्वमनृतवादिनी असि ।" इत्युक्त्वा महाकविस्ततः प्रचचाल । तथात्वे सति सा ग्राम्यभाषायां गालियुक्तां वक्तां तथा आरभत यत् पथि गच्छन्तो जनाः महाकविं मां च सकुतूहलमवलोकयामासुः ।

मयोक्तम्—"कविवर ! अलं विवादेन । दीयतामस्यै आणकमेकम् ।"

अरे भगवन ! सा लुण्टाकी अस्ति । कुतोऽहं ददानि तस्यै आणकम ? नास्ति मत्सकाशे किञ्चिदपि द्रव्यम ।

"भवतु । तर्हि अहं ददामि ।" इत्यहं तस्यै आणकमेकमददाम् ।

तत आवां प्रस्थितौ । मार्गे महाकविरपृच्छत्—अपि तस्मिन् दिने पाटिलः मामुद्दिश्य किमपि कथितवान ?"

"आम् । सः भवन्तं प्राशंसत् । अवदत्—भवादृशाः सुकविः विद्वांश्चास्मिन् नगरेऽन्यो नैव विद्यते ।"

"अहो अहो अहं तु जानामि पाटिलम् । वस्तुतः सः मदीयः सुयोग्यः शिष्यः अस्ति । मत्संमुखे स यत् किञ्चिज्जल्पति किन्तु परोक्षे स्तौति माम । भवतु, भवानद्य मद्गृहमागच्छतु ।"

---

३. 'टमाटर' इति भाषायाम् ।

४. "तौलिया" इति भाषायाम् ।

महाकवेः गृहं गन्तुकामोऽहं नासम् । किन्तु तद्दिने बलान्मां सोऽनयत् । एकस्यां सङ्कीर्णवीथ्यां तस्य गृहमासीत् । द्वारं प्राप्य तेन तदुद्घाटनार्थमर्गलां पीडयित्वा शब्दः कृतः । प्रथमं तस्य काऽपि प्रतिक्रिया नाभवत् । गृहस्याभ्यन्तरे काऽपि महिला साक्रोशं सक्रोधं किमपि कथयन्ती कमपि बालकं ताडयति स्म । तस्य रुदितं तस्याश्च क्रोधविजल्पितं बहिः मार्गे गच्छतां जनानामपि कृते कर्णगोचरमासीत् । अथ महाकविः उच्चैरक्रन्दत्—अरे महेन्द्र ! अयि महेन्द्र !! किं मृतोऽसि ? उद्घाटय द्वारम् ।"

ततः सप्तवर्षदेशीय एकः बालकः द्वारमुद्घाटितवान् । तस्य शरीरे किमपि वस्त्रं नासीत् । तस्य परिक्षामं देहमाकृतिञ्चावलोक्यायं महाकवेः पुत्रक इत्यहं पर्यालोचयं मनसि । तस्य नासिकातो मलद्रवं निस्सरति स्म । महाकविस्तमवलोक्य जुगुप्सया अवदत्—"अपेहि रे चाण्डाल ! किं वस्त्राणि नैव सन्ति ते सकाशं यन्नग्नः परिभ्रमसि सर्वत्र ?" ततः सः मामवादीत्—"आगच्छतु भवान् ।" अहमन्तःप्रविष्टः । यं कक्षं प्रविष्टस्तस्मिन्नेको दशवर्षदेशीयो बालकः उपविष्ट एकस्मिन् कोणे रोदिति स्म । मां वीक्ष्य सः सत्वरं बहिर्निष्क्रान्तः । एकस्मिन् कोणे एकं शीर्णमास्तरणमविद्यत । महाकविस्तत् सत्वरं धूसरभूम्यामास्तीर्यावदत्—"आस्यताम्" इति ।

अहमुपविष्टः । मत्सम्मुखमन्तर्गमनाय द्वारमासीत् । तस्मादनावृतद्वारादहमवालोकयं यत् प्राङ्गणे काचन गजाङ्गनेवातीव पीवरस्थूलकाया पुरातनजीर्णशाट्यलङ्कृता रमणी एकं पञ्चवर्षकल्पं बालकं "हरामखोर, बदमाश" इत्याद्यपशब्दान् व्याहरन्ती निर्दयं ताडयति इति । महाकविरप्येतदवालोकयत् । तामुपसृत्य च प्रोवाच—"अयि भोः ! कथमिव एवं तपस्विनं शिशुं पीडयसि ?"

"स तपस्वी !" मोदकं देहि, मोदकं देहीति क्रन्दनेन विस्फोटितौ मे कर्णौ अनेन । एते चाण्डालाः मम रुधिरं पास्यन्ति आहोस्वित् भक्षयिष्यन्ति माम् ? भवांस्तु अहर्निशं बहिरेव तिष्ठति । अहमेव सदा अत्र भ्राष्ट्रिकायां ज्वलामि । नाहमधुनैतन्सर्वं सोढुं शक्नोमि । भवांस्तु विषमानीय मह्यं ददातु येन... ..."

"अये चण्डि ! अलं कोपेन । पश्य, अतिथिरेकः समायातः । अतः चायपेयं साधय ।"

सा सक्रोधं "दुग्धं नास्ति गृहे" इति कथयन्ती अपगता । महाकविः पुनर्मत्सकाशमागतः । पार्श्वे उपविश्य स्वकीयकृष्णपीतदन्तपङ्क्तिं निस्सारयन्

बहिः अवादीत्—"इयं मे धर्मपत्नी । इयं साक्षाच्चण्ड्याः अवतारः अस्ति । एनामधिकृत्यैका कविताऽपि मया लिखिता—"पत्नीप्रशस्तिः" इति । पश्यतु भवान्—

"चण्डीं चण्डमुखीं चलच्छविमयीं चाञ्चल्यमुग्धाननां
कालीं कृष्णमुखीं करालकठिनां क्रुद्धां विलुप्तस्मिताम् ।
मुग्धां मञ्जुमुखीं प्रमोदजननीं लम्बोदरीं सुन्दरीम्
दुर्गां पापविनाशिनीं भगवतीं पत्नीं नमामो वयम्" ॥

"अहो अपूर्वा हास्यमयी भवतां कविता !" अहमवदम् ।
तत्क्षणमेव क्रोधेनोद्धृतभ्रूः विकम्पिताधरः महाकविराह—

"अये किं हास्यरसस्य कविता एषा भवद्भिर्मन्यते ?" अयि भगवन् ! इयं कविता विशुद्धभक्तिभावप्रेरितेन मया लिखिता । नैव जानाति भवान् अहं दुर्गाया उपासकोऽस्मि । स्वपत्न्यामपि तस्याः भगवत्याः प्रतिच्छविमवलोक्य मया एषा रचना... ..."

"क्षम्यतां भगवन् ! कथमज्ञोऽयं जनो भवादृशानां कवितायाः मर्म ज्ञातुं प्रभवेत् सुकवीनाम् ?" अहं किञ्चिदुद्भ्रान्तमनस्कोऽवदम् ।

महाकविः शान्तः अभवत् । किन्तु कवितापाठं प्रति भग्नोत्साहस्तूष्णीमेवातिष्ठत् । ततः अकथयत्—"सतीशमहाभाग ! भवान् मम क्रोधेन उद्विग्नो मा भूत् । वस्तुतः अहं कविरस्मि । कवयस्तु संवेदनशीलाः भवन्ति । अपरञ्च—मम जीवनं कठोरसंघर्षाणां मध्ये व्यतीतम् । अतः काचित् कठोरता मे प्रकृतौ समागता वर्तते । पश्यतु भवान्—अहमेकस्य दरिद्रपण्डितस्य पुत्रः स्वग्रामादस्मिन्नगरेऽध्ययनायागतः । महता परिश्रमेण मया अध्ययनं कृतम् । अद्यकालिकाः विद्यार्थिनस्तु इतस्ततः परिभ्रमन्ति—चित्रपटं पश्यन्ति—मया तत्सर्वं नैव कृतम् । मया एकाग्रचेतसा अध्ययनं कृतम् । तथापि निर्दयैः परीक्षकैरहं तृतीयश्रेण्यामुत्तीर्णीकृतः शास्त्रिपरीक्षायाम् ! कीदृशमन्याय्यम् !! दुर्गे ! दुर्गे !!" इत्युक्त्वा महाकविर्महत्या वेदनया व्याकुलः स्वचक्षुषी निमील्य ध्याननिमग्न इव अभवत् । एवं कोऽपि कालो व्यतीयाय । अथ सहसा अक्षिणी उन्मील्यावदत् सः—"अहो अहं कण्टकबहुलमार्गे खलु सञ्चरामि ! जनाः स्वाज्ञतया मूर्खतया मम मार्गे

सदैव बाधाः उपस्थापयन्ति । किन्तु अहं दाक्षिण्यतया तेषामपराधान् सहे । वस्तुतः अहं क्रान्तिप्रियोऽपि उदारतावादी अस्मि । भवद्भिर्मम "आत्मपरिचयः" इतिरचना श्रुता न वा? तस्यां सर्वा स्वकीया अन्तर्व्यथा मया प्रकटीकृता । आङ्ग्लभाषायाश्छटापि तस्यां राजते । अहमुदारतावादी अस्मि । अतः आङ्ग्लभाषाऽपि मया अधीता । पश्यतु भवान्—

"थर्ड[1] येन डिवीजनं[2] ह्यधिगतं 'शास्त्री'-परीक्षार्णवे
निन्दां यः सहते सदैव कुधियां दग्धाननद्रोहिणाम् ।
सोऽयं भावविभूषितं चिरनवं तन्वन् हि काव्यं सदा
काव्याकाशविराजदिन्दुविमलो भव्यः कविः कण्टकः ॥"

अत्रान्तरे एव महाकवेः कोऽप्यपरः किशोरपुत्रः आगत्योवाच—पितः! अम्बा पृच्छति—भोजनार्थं किं भवद्भिरानीतं शाकादिकमिति । महाकविः सहसा कल्पनालोकात् यथार्थधरातले निपतितः विमनस्कतया कोणे स्थापितां पोट्टलिकामपनेतुमसङ्केतयत् । सोऽपि पोट्टलिकामादाय गतः । कस्मैचित् कालाय शान्तिस्तत्र व्यराजत । अवसरमवलोक्याहमकथयम्—"महती वेला अत्र स्थिते मयि सञ्जाता । ननु साधयामि ।"

"अये चायपेयं पीत्वा तावत् गन्तव्यम् । अरे महेन्द्र!"

"अलमायासेन । नास्ति मे इच्छा सम्प्रति किमप्यश्नातुं वा पातुं वा ।" इति नमस्कृतिं निवेद्याहं सत्वरं ततो निष्क्रान्तः ।

(३)

तस्मिन् दिने महाकविः मद्गेहे मञ्चाधारस्थापितमेकं मुद्रितकर्गद-मवलोक्य पृष्टवान्—"महाशय, किमेतत्?"

"देहल्यामेकं संस्कृतकविसम्मेलनं भविता । इदं तस्य निमन्त्रणपत्रं मत्कृते ।"

"भवत्कृते?" महाकविरतीवाश्चर्यतुन्दिलः स्वकीयोलूकनेत्रे बहि-र्निष्कासयन्निव जगाद—"किं भवान् अपि संस्कृते कविताः लिखति?"

"आम् श्रीमन्! यत्किञ्चित् ग्रथ्यते मयाऽपि ।"

---

१. Third. २. Division.

"भवताऽपि यत्किञ्चित् .....! किन्तु भवद्भिस्तु नाहं कदाप्युक्तः यदहमपि संस्कृते लिखामीति । स्वकीया कापि रचना न दर्शिता । सहृदयानां मध्ये काव्यपाठेन तु काव्यपरिष्कारः सम्भवति ।"

अहं महाकविं स्वकविताः श्रावयितुं दर्शयितुं वा नैच्छम् । किन्तु तस्यां निर्बन्धाग्रहप्रेरितः एकां पञ्जिकां निस्सार्य तस्य समक्षम् अस्थापयम । अस्यां मम विभिन्नसंस्कृतपत्रपत्रिकासु प्रकाशितकवितानां मुद्रितप्रतिलिपयः सङ्कलिता आसन् ।

"अये भवतां रचनास्तु प्रकाशिताः अपि !" अधिकतरमाश्चर्यं निरूपयन् महाकविरभाषत । ततः सः रचनासु यत्र तत्र दृष्टिमददात् । व्यक्तमेव तास्तस्मै नारोचन्त । उदासीनतया सः पञ्जिकां परावर्तयन्नवदत्—"भवद्भिः संस्कृत-कवितारचनाभ्यासः परिवर्धनीयः । मया संस्कृते बहूनि काव्यानि विरचितानि । भवद्भिर्मम "दुर्गास्तुतिः" इत्येषा कविता श्रुता न वा ? सा कविता कल्लोलमासिके....."

"श्रुता भगवन् !" महाकविः पुनरशेषां तां रचनां पठिष्यति इत्याशङ्कया अहं शीघ्रतयाऽवोचम्—"भवतां मुखारविन्दात् पूर्वमेव मया श्रुता सा कविता ।"

"भ...भवतु । अथ कतमे दिने तत्कविसम्मेलनं सम्पत्स्यमानम् ?"

"अगस्तमासस्य विंशतारिकायाम् ।"

"एवम् । जुलाईमासोऽयं समाप्तप्रायः । किन्तु कथमहं नाहूतोऽस्मिन् कविसम्मेलने ? कः संयोजयते एतत् ?

"अस्ति तावदेका 'संस्कृतविश्वपरिषद्' इति संस्था । तस्याः परिषदस्तत्त्वावधानेऽस्यायोजनं भवति ॥"

"भवतु । यदि नाम अहं परिषदधिकारिभिर्नाहूतस्तेन किम् ? अहमना-मन्त्रित एव गमिष्यामि भवता सह स्वकविताश्च पठिष्यामि ।"

मया चिन्तितम्—"अयं महाशयः मया सह आगमिष्यतीति कुत इयं विपत्तिः शिरसि समापतिता ?" उक्तं च—"अनामन्त्रितस्य भवतस्तत्र गमनं युक्तं नास्ति ।"

"अये ! तस्य कविसम्मेलनस्य संयोजकास्तु अज्ञाः सर्वे ! यदाऽहं स्वयमेव गत्वा तत्र कविताः श्रावयिष्यामि तदा ते ज्ञास्यन्ति यदहमप्येकः कविरस्मि ।"

(४)

अहं बाष्पगन्त्र्याः[५] सम्पुटके[६] उपविष्टः गवाक्षात् बहिरवालोकयम् । महान् खलु संमर्दस्तत्रासीत् । किन्तु महाकवेराकृतिर्न कुत्रापि दृश्यते स्म । अहं समाचारपत्रविक्रेतुः तद्दिवसस्य पत्रमक्रीणां ससन्तोषं चौच्छ्वसम् ।

महाकविः देहलीयात्रायै भृशमुत्सुक आसीत् । अहमगस्तमासस्य विंशतारिकायां तत्र गमिष्यामीति विज्ञाय सोऽपि मया सह गन्तुकामोऽभवत् । "माम् आह्वातुं भवान् मा आगच्छतु मद्गृहम् । अहं स्वयमेव सार्द्धैकादश-वादनवेलायां सञ्चारकुट्टिमं[७] प्राप्स्यामि" इति कथयित्वा सञ्जायमानायामपि द्वादशवादनवेलायां स नैवागत आसीत् ।

सहसा बाष्पगन्त्रीपालकः[८] यानगमनाय असङ्केतयत् । यानं च मन्द्र-गत्याऽग्रसरमभवत् । अहं महाकवेरनागमेन भृशमतुष्यम् । तस्मिन्नेव काले गवाक्षादवलोकितं यत्सः त्वरितत्वरितगत्या आगच्छतीति । माम् अवलोक्य सः प्रधावन् सम्पुटकस्य अभ्यन्तरे प्रविष्टः मत्पार्श्वे च उपविष्टः । मे प्रसन्नतालता नैराश्यतुषारनिष्पीडिता अभवत् ।

महाकविरवदत्—"आगमने किञ्चिच्चिरायितं मया । मम गृहिण्या पाथेयसम्पादने बहु विलम्बः कृतः । सा मयि भृशं स्निह्यति अतः..... ।"

सहसैव दशद्वादशकल्पाः यात्रिणः ससंभ्रमं शीघ्रतया प्रविष्टाः । तदा ईदृक्कोलाहलो जातो यदहम् अग्रे महाकविना यत् कथितं तत् श्रोतुं नाशक्नुवम् ।

बाष्पगन्त्री द्रुतगत्या प्राचलत् । महाकविः कामपि स्वकीयां कवितां श्रावयितुं प्रवृत्तो भवेत् चेदित्याशङ्क्याऽहं समाचारपत्रमादाय तदध्ययन-

---

५. 'रेल' इति भाषायाम् ।
६. 'रेल' का डिम्बा' इति भाषायाम् ।
७. 'रेल्वे कम्पार्ट्मेण्ट्' इत्याङ्ग्लभाषायाम् ।
८. 'गार्ड्' इत्याङ्ग्लभाषायाम् ।

व्यस्तमिवात्मानं प्रादर्शयम् । महाकविरपि मया सह पत्रगतशीर्षकेषु दृष्टिमददात् । एकस्मिन् स्थले "केन्द्रीयगृहमन्त्रिगुलजारीलालनन्दाद्वारा भ्रष्टाचारनिरोधाय सदाचारसमितेः घटनम्" इति पठित्वा स उच्चैरगदत्—"अरे एते धूर्त्ताः कांग्रेसीयाः कीदृशं पाखण्डमाचरन्ति! स्वयमेव भ्रष्टाचारपरायणाः समितीनां सङ्घटनं कुर्वन्ति!" महाकवेः स्वर एतावदुच्चः सञ्जातः यदन्ये यात्रिणः तं सकौतुकं द्रष्टुमारभन्त । "पश्यतु भवान्", सः अवदत्—"वयं गोरण्डानां राज्ये नितरां सुखिन आस्म । वस्तुत आङ्ग्लदेशीयाः कथं शासनतन्त्रं चलतीति जानन्ति स्म । कथं न जानीयुः? रक्तमुखास्ते हि खलु रामायणकालिकसुग्रीवहनुमदादिमहाकपीनां वंशजाः सन्ति । सम्प्रत्यस्मिन् स्वराज्ये शूद्राणामेव राज्यं सञ्जातम् । कथमिदानीं देशस्य उन्नतिः संभवेत्? एतत् सर्वं तेन महात्मगान्धिना कृतम् । वणिक्पुत्रस्तु स आसीत्! तत्पश्चात् जवाहरलालः अण्डमांसभक्षकः । सोऽपि नाम सर्वनाशपथम् अनयद् देशम् । अधुना तस्यैव पुत्री...किं कथयामि तद्विषये! किमिन्धनकर्मकुशला अबला अपि शासितुं जानन्ति? पश्यतु भवान्...."

"ए मिस्टर्! प्लीस् स्टॉप् दिस् चेट्टरिंग् । डोण्ट् यू सी दट् अदर् पर्सन्स् आर् आल्सो सिटिंग् इन् द कम्पार्टमेण्ट...?"

महाकविः विरतभाषणस्तस्यां दिश्यवालोकयत् । एका आधुनिकी रमणी एतदुक्त्वा सक्रोधं तं पश्यति स्म । महाकविस्तामवलोक्य विभ्रान्त इव मामपृच्छत्—"अये किमत्रभवती कथयति?" अहं महाकवेराङ्ग्लभाषावैशारद्यं परिज्ञायावदम्—"एषा कथयति यद् भवद्भिरेतावदुच्चस्वरेण संलापो नैव कार्यः" इति ।

मद्वचः श्रुत्वा महाकविस्तां महिलां क्षमायाचनापुरस्सरमवादीत्—"ओह, ऐ आम् वेरी सोरी..." पश्चाच्च हिन्दीभाषायामेव अकथयत्—"देवि, क्षम्यतां बालिशताऽस्य जनस्य । वस्तुतः अहं कविरस्मि । संवेदनशीलः खलु कविर्भवति । अतः स्वकीयभावनाप्रवाहे....."

किन्तु सा स्त्री अङ्गारप्रखरनेत्राभ्यां महाकविं तथा अवलोकयति स्म यत् स मौने एव स्वकुशलताममन्यत । कस्मैचित् कालाय तूष्णीं

संस्थितः । पश्चात् स्कन्धस्थिताङ्गप्रौञ्छनेन स्वेदक्लिन्नमुखं प्रमार्ज्य मन्दस्वरेण मामभाषत—"पश्यतु भवान् दुरवगाहता वञ्चनाचरित्रस्य ! एषा सुन्दरी मदीयविचारैरावर्जिता मामनुरक्ताऽपि उपरिष्टात् क्रोधं नाटयति!" इति । रसिकतया पुनः पुनस्तामवालोकयत् । किन्तु पार्श्वस्थपुरुषेण सह संवादरतया तया महाकवेस्तच्चरितं नाबुध्यत । ततो महाकविः पुनः मामकथयत्—"एनामवलोक्य नवीना एका कविता स्फुरति हृदये!" इति । स्वपरिधानसेवकात्[९] कर्गदमेकं निस्सार्य धारालेखनीञ्चादाय मन्दं किमपि गायन् लिखंश्च स्थितः ।

एतस्मिन्नव काले यात्रापत्रनिरीक्षकस्तत्रायातः । अन्येषां मम च यात्रापत्राणि निरीक्ष्यासौ काव्यगुम्फनविस्मृतावधानं महाकविमाह—"महाशय ! प्रदर्श्यतां तावत् स्वयात्रापत्रम् ।"

"या....यात्रापत्रम् ? तत् तु मया क्रीतमेव नहि । नहि, नहि, क्रीतं तु आसीत् (परिधानसेवकेऽन्विष्य) अहो कुत्रापि परिधानसेवकात् निपतितम् !"

सहयात्रिणो महाकवेरेतन्नाटकं सकौतुकमवलोकयामासुः ।

"यदि नास्ति यात्रापत्रं तर्हि द्विगुणितमूल्यं देयम् ।"—यात्रापत्रनिरीक्षकमहोदयोऽवदत् ।

"द्विगुणितमूल्यम् ! अये भगवन् ! कीदृशोऽयं नियमः ! दुर्गे ! दुर्गे!!"

"कस्मात् स्थानात् भवानारूढः बाष्पगन्त्रीम् ?"

"अम्बिकापुरतः"

"क्व गन्तव्यम् ?"

"देहलीम् ।"

"तर्हि त्रयोदशरूप्यकाणि देयानि ।"

---

९. 'जेब' इति भाषायाम् (Pocket) ।

"त्रयोदशरूप्यकाणि ! किन्तु मत्सकाशं तु दशरूप्यकाणां कार्गलमुद्रा[१०] एव एका विद्यते । कुतः त्रीणि रूप्यकाणि आनयामि ? भवतु"—सः मामकथयत्—"भवानेव ददातु ।"

अहमजानाम् यत् तस्य सकाशं पर्याप्तद्रव्यमविद्यत तथापि स्वद्रव्योपहस्तिकातः[११] रूप्यकत्रयं निस्सार्य तस्मै अददाम् । ईदृशी यत्किञ्चनकारिताऽपि विद्यते तस्मिन्निति मया तदानीमेव ज्ञातम् ।

गते यात्रापत्रनिरीक्षके महाकविरुवाच—"पश्यतु भवान् ! कीदृशो दुराचारो वर्तते ! भवतां मार्गव्ययस्तु कविसम्मेलनसंयोजकाः दास्यन्ति । अहं स्वव्ययेन गच्छामि । तदुपरि द्विगुणितमूल्यं सः मत्तो गृहीतवान् ! दुर्गे ! दुर्गे !!" इति ।

(५)

देहलीं प्राप्य महाकवेराचरणैः भृशमसन्तुष्टेन मया स्पष्टरूपेण उक्तम्—"मत्कृते भोजनावासव्यवस्था तु कविसम्मेलनसंयोजकाः करिष्यन्ति । किन्तु भवत्कृते अहं किमपि कर्तुं नैव शक्ष्यामि । भवद्भिः स्वयमेवात्मार्थे व्यवस्था करणीया" इति । महाकविः क्षणाय चित्रलिखित इव मां प्रैक्षत । ततः पीतकृष्णां स्वदन्तपंक्तिं प्रदर्शयन्नवादीत्—"अये भवद्भिः कोऽप्यायासो नैव करणीयो वर्तते । अत्र मे एकः श्यालो वसति । महती पुनस्तस्य मयि आस्था । अतस्तद्गृहेऽहं स्थास्यामि । भवद्भिस्तु केवलं मदीयकवितापाठव्यवस्थायै कविसम्मेलनायोजकाः वाच्याः" इति ।

"अहं तदपि कर्तुं नैव शक्नोमि । कविसम्मेलनसंयोजकेन सह नास्ति मे कोऽपि परिचयः ।" इत्युक्त्वा अहं महाकविं तत्रैव परित्यज्य "ग्रीन्-होटल्" इत्याख्यस्थानाय प्रस्थितः यत्र मम आवासादिकृते व्यवस्था कृता आसीत् ।

---

१०. 'करेन्सी नोट्' इत्याङ्ग्लभाषायाम् ।

११. 'बटुवा' इति भाषायाम् ।

(६)

कविसम्मेलनस्यायोजनं "थियेटर् कम्यूनिकेषन् बिल्डिङ्ग्" इति स्थाने अभवत् । मदतिरिक्तं प्रायशो दश सुकवयस्तत्र आसन् । चिरकालोपरान्तं संस्कृतकाव्यधारा कर्णयोः प्रवहितेति परमप्रमोदाञ्चितमभवच्चेतः । यदा अहं देहलीविश्वविद्यालये अपठं तदा कदाचित् द्वित्रिकृत्वः संस्कृतकविसम्मेलनेषु अद्यतनसंस्कृतकवीनां कवितापाठाः मया श्रुताः आसन् ।

मया कतिपयाः स्वकविताः पठिताः । महाकविमहं कुत्रापि नैव दृष्टवान् तदानीं यावत् । किन्तु यदा कविवरः पन्तुलः स्वकवितामेकां पठित्वोत्थितस्तदैव सहसा झञ्झावात इव मञ्चमारुह्य महाकविः ध्वनिविस्तारकयन्त्रसम्मुखं[१२] स्थितः । कविसंमेलनस्य सञ्चालकः श्रीकृष्णचन्द्रशर्मा तं निवार्य अकथयत्—"किमिदं भवद्भिः क्रियते ?" इति ।

"अहमपि कवितामेकां पठितुमिच्छामि ।"

"किं न मया पूर्वमेवोक्ताः भवन्तो यद् भवतां नाम कवीनां सूच्यां नैव विद्यते ।"

"अरे किमेतेन? भवान् कः अस्ति? अहं कवितां पठिष्यामीत्यलम् ।"

"महाशय! किमिदं चिदम्बररहस्यम् ? भवान् मञ्चादधोऽवतरतु ।"

"अलं विवादेन ।" अध्यक्षः आचार्यपाण्डेयः अवदत्—"पठतु नाम भवान् कविताम् ।"

शर्मा महोदयः किञ्चिदसन्तुष्टोऽपि अध्यक्षस्य स्थापनां समादृत्य तूष्णीं स्थितः । मञ्चस्थाः कवयः श्रोतृसमुदायश्च महाकविं सकुतूहलं ददृशुः ।

अथ महाकविः दक्षिणबाहुमुद्यम्य उच्चस्वरेण जगर्ज—"अये श्रोतारः! अयि श्रोतारः! अहं कविरस्मि । अहं साहित्यजगति "महाकविः कण्टकः" इति नाम्ना ख्यातोऽस्मि । अहं कुमार्गगामिनां मार्गे कण्टक इव वर्ते इति

---

१२. 'लाउड्स्पीकर्' इत्याङ्ग्लभाषायाम् ।

सार्थकं मे नाम । भवतां कविसम्मेलनस्यास्य सञ्चालकः मदीयकवितापाठं नानुमनुते स्म । किन्तु "निरङ्कुशा हि कवयः" इति विचार्य अहं जनताजनार्दनस्य सेवायां समुपस्थित एव । एका नवीना रचना प्रस्तूयते सम्प्रति । अद्यैव यात्रावसरे एषा मया विलिखिता । "तस्याः कोपः" इति शीर्षकम् । श्रूयताम्—अस्यां कवितायां वाल्मीकेः प्राञ्जलता, कालिदासस्य...

अस्मिन्नेव समये श्रोतृसमुदायात्केनापि एकं शीर्णमशुचि ताम्रभण्टाकी-फलं महाकवेः वदनमुद्दिश्य प्रक्षिप्तम् । यद्यपि संस्कृतकविसम्मेलनेषु श्रोतॄणां संख्या स्वल्पा एव भवति, किन्तु अस्मिन्नवसरे केचन उद्दण्डा युवानस्तत्र आसन् । मन्ये तेषु एकतमेनेदं कृतं स्यात् । दैवयोगात् तत् फलं महाकवेः "कालिदासस्य..." इति कथयतः विवृतमुखाभ्यन्तर एव पपात । महाकविरेतत् फलं भक्षयामि उत उद्गिरामि इति दोलायमानमतिस्तस्थौ । अथ यथाकथञ्चित् तत् गलादधोऽवतार्य विहसन्नवदत्—"अहो भवतामतिथि-परायणता! मह्यं ताम्रभण्टाकीफलं भृशं रोचते । किन्तु प्रथमं कविता तावत् श्रोतव्या । अस्तु, अहमेतावदकथयं-यन्मदीयकवितायां कालिदासस्य.."

किन्तु उच्छृङ्खलबालैस्तादृशः श्रोतॄणां मध्ये कर्णविस्फोटकः कोलाहलः समारब्धः यत् तस्मिन् महाकवेः वाणी निमग्ना अभवत् । अथ श्रोतृवर्गात् द्वित्राः बलिष्ठजना उत्थाय बलान्महाकविं मञ्चादपानयन् ।

संयोजकमहोदयः श्रोतॄन् शान्त्यवलम्बनाय अप्रार्थयत आचार्यपाण्डेयं च काव्यपाठाय प्रैरयत् ।

अहं द्वितीयं दिवसं देहल्यामेवात्यवाहयम् । मम छात्रजीवनसुहृदः केचन तत्र अविद्यन्त । तान् समागम्य विगतजीवनस्य मधुरस्मृतीः नवयोगाः विधातुमहमभ्यलषम् ।

सायङ्काले अहं बलभद्रप्रसादेन सह चाँदनीचौके निरुद्देश्यं भ्रमन्नासम् । बलभद्रः स्नातककक्षायां मे सहपाठी प्रियसखा चासीत् । इतस्ततो भ्रमद्भ्यामावाभ्यामेको विविक्तमार्गं आश्रितः । सहसा एकस्मिन् स्थाने किमप्याश्चर्यकरं मया वृत्तं प्रत्यक्षीकृतम् । एकस्मिन् मलदूषिते

आधावे [१३]जीर्णकाष्ठशिलायामासीनो महाकविः नखम्पचाः[१४] बेसनभर्जिकाः[१५] खादति स्म । पथि सञ्चरतां जनानां मध्ये सः मां नावालोकयत् ।

भ्रमणे कोऽपि कालो व्यतीतः । अथ बलभद्रः गतरात्रिजागरणक्लान्त्या अनिच्छन्तमपि मां 'प्रजा' इत्यस्मिन् छविगृहे साग्रहमेकमाङ्ग्लचित्रं दर्शयितुमनयत् ।

मनोभिरामे छविगृहे आवां ससुखमुपविष्टौ आस्व । छविगृहशालायामितस्ततोऽवलोकनपरस्य मम दृष्टिः सहसा पार्श्वस्थपुरुषस्योपरि पपात । अहं विस्मयविसंज्ञ इवाभवम् । किं स्वप्नं पश्यामि उत प्रमत्तोऽस्मि? स्वचक्षुषी प्रमार्ज्य पुनः सावधानमवालोकयम् । महाकविरेव आसीत् सः! तस्मिन्नेव क्षणे सोऽपि मामपश्यत् । किञ्चिदुद्भ्रान्तस्य तस्य मुखान्निस्ससार—अये! सतीशमहाभाग! भवान् अत्र!..भवानपि चित्रपटदर्शनार्थमायातः! भवतु, शोभनमेतत् । भवानपि कविरस्ति अहमपि कविरस्मि । कवयस्तु मनोरञ्जनप्रियाः भवन्त्येव । मम चित्रपटदर्शनस्यायं प्रथमावसरः । अत्र चाँदनीचौके इतस्ततः परिभ्रमतो मे चेतस्यभवत्—चित्रपटदर्शनेन वर्तमानसभ्यताविषये स्वज्ञानं संवर्धनीयमिति । तदत्रायातोऽस्मि ।

"साधु भवान् कथयति ।" इत्युक्त्वा अहं मौनमभजम् ।

बलभद्रो मामपृच्छत्—"भोः कोऽयं वृद्धः?"

"अये नीचैस्तावत् वद । अयं महाकविः कण्टकः अस्ति । संस्कृतकविसम्मेलनेऽनाहूतोऽपि मया सह अम्बिकापुरत आगतः ।"

"कवयस्तु सर्वे विपर्यस्तमस्तिष्काः भवन्त्येव ।" तस्मिन्नेव समये चित्रं प्रारब्धम् अतोऽहं बलभद्रस्य आक्षेपस्य किमप्युत्तरमदत्त्वैव रजतपटे दृष्टिमददाम् । महाकविरपि सौत्सुक्यमेकाग्रेण मनसा कियत् कालं यवान्मौनमाश्रित्य तदवलोकयन् संस्थितः । किन्तु यदा आङ्ग्लचित्रपरम्परानुसारि

---

१३. 'ढाबा' इति भाषायाम् ।

१४. 'गरमागरम' इति भाषायाम् ।

१५. 'बेसन की पकौड़ी' इति भाषायाम् ।

केवलमर्धोरुकञ्चुकमात्रम् परिदधाना रजतपटमवततार कथानायिका तदा सः मामपृच्छत्—"सतीशमहाभाग ! किम् आङ्ग्लदेशे वस्त्राणामभावो भवति यदियं सुन्दरी....."

"अथ किम् ?" अहं मनसि विहसन्नवदम् । अथ यदा नायकः नायिकां चुम्बितुं प्रावर्तत तदा महाकविः स्वहृदये परमानन्दसन्दोहमनुभवन्नपि उपरिष्टाज्जुगुप्सां नाटयन्नाह—"अरे कीदृशोऽयं निर्लज्जः तस्यास्तन्वङ्ग्या वदनं स्पृशन् न सङ्कुचति !" इति ।

सार्द्धनववादनवेलायां चित्रं समाप्तं वयं च बहिरायाताः । अहं महाकविमपृच्छम्—"भगवन् ! कुत्र भवता गन्तव्यम् ?" इति ।

"मम श्यालः समीपमेवात्र वसति । तस्य गृहं गमिष्यामि । भवतां आसितं[१६] कुत्र विद्यते !"

"अहं तु 'ग्रीन् होटल्' इत्येतत् स्थानं परित्यज्य (बलभद्रं सङ्केतयन्) अस्य महाभागस्य गृहे तिष्ठामि । एनां रात्रिमत्र अतिवाह्य श्वः प्रभाते इतो गमिष्यामि ।"

"अरे श्व एव ! कथमीदृशी त्वरा?"

"श्वो मया महाविद्यालये उपस्थातव्यम् । मम नैमित्तिकावकाशः[१७] अद्य समाप्तः ।

भवतु । तत्र गत्वा भवद्भिर्मम गृहे अयं सन्देशः प्रेषणीयः यदहं चतुर्भिः पञ्चभिर्वा अहोभिस्तत्र प्राप्स्यामि । येन मे गृहिणी उत्कण्ठिता न भवेत्" ।

किञ्चिद् विरम्य सोऽकथयत्—"पश्यतु भवान् कीदृशमन्याय्यं जगति वर्तते । तस्य कविसंमेलनसंयोजकस्य हृदयं ममोत्कर्षमवलोक्यादहत् । सः

---

१६. 'अड्डा' इति भाषायाम् ।

१७. "केजुअल् लीव्" इत्याङ्ग्लभाषायाम् ।

तान् धूर्तान् सङ्केतयित्वा बलान्मां मञ्चादपासारयत्। भवता तु दृष्टमेव य श्रोतारो मदीयकाव्यपाठं समीहन्ते स्म" इति।

अहम्—"एवम्" इत्युक्त्वा मौनमभजम्। महाकविः पुनः विनम्रस्वरेणावदत्—"एका मे प्रार्थना वर्तते। तत्र गत्वा अयं मे चित्रपटदर्शनवृत्तान्तः कस्मा अपि नैव कथनीयः। भवांस्तु जानात्येव—तत्रत्या अज्ञानिनो जनाः मामुपहसिष्यन्ति। मम प्रेयस्याः क्रोधमपि वेत्ति भवान्। अतः कृपया.....'

"अरे भवद्भिर्मयि विश्वासः कर्तव्यः।" इति तं समाश्वास्य अहं बलभद्रस्य हस्तमादाय ततः प्राचलम्। महाकविरपि सन्तुष्टः स्वश्यालस्य गृहं प्रस्थितः। मार्गे अहं महाकविकण्टकस्य चरितं विशकलय्य बलभद्राय अकथयम्। सोऽवदत्—"एनं महापुरुषमधिकृत्य भवान् एकं महाकाव्यम् उपन्यासं वा लिखतु" इति।

"लिखिष्यामि यदि समयं लभे।"

द्वितीयः खण्डः

(१)

देहल्याः परावृत्ते मयि मासद्वयं व्यतीतम्। किन्तु महाकविः नागच्छत्। तस्य एकं पत्रं मया प्रागुपलब्धमासीत्। तत्र लिखितमासीत्—"अस्मिन् महानगरे नवीनजगतीव निवसन्नहं तत्रागन्तुं नोत्सहे, तथापि कतिपयैरहोभिरागमिष्याम्येव। एकं पत्रं स्वज्येष्ठपुत्राय पूर्वं मया लिखितम्। भवानेतत् पत्रं कृपया तस्मै प्रदर्शयतु येन मद्गेहे कोऽपि 'जनः' उत्कण्ठितो न भवेत्। —कण्टकः।"

अथैकदा प्रवासात्प्रत्यागतो महाकविः सहसा मद्गृहे पदार्पणमकरोत्। एतावत्कालोपरान्तमहं तं दृष्ट्वा विस्मयस्तब्धोऽभवं यतस्तस्य वेषभूषायामामूलचूडं परिवर्त्तनमदृश्यत। शिरसि "गान्धी टोपी" इति ख्यातं परिधानं

व्यराजत नेत्रयोश्चैकमुपनेत्रम् । वस्त्राणि खद्दरनिर्मितानि । शाट्याः स्थाने पादयामः[१८] अशोभत ।

अहं महाकविमपृच्छम्—"अये कदा भवान् प्रत्यागतः ?"

"अद्यैवागतोऽस्मि । देहल्यां मया बहु अवलोकितं बहु श्रुतं बहु अनुभूतं च । एकस्मात् पुस्तकालयाद् बहूनि पुस्तकान्यपि मया पठितानि । अहं गान्धिवादेन भृशं प्रभावितोऽस्मि जातः । समाजवादेनैवास्य देशस्य समुद्धारः सम्भवी इति मे निष्कर्षः । इन्दिरादेव्या अपि एकं भाषणं मया तत्र श्रुतम् । कियच्चारु वक्ति सा, सतीशमहाभाग ! वस्तुतः नारीणामेवायं समय आगतः । नार्य एवास्मिन् देशे शासितुं प्रभवन्तीति मे मतिः । पुरुषाणां मतिस्तु अनुदिनं परिहीयते ।" एवं महाकविः राजनीतिसम्बन्धिस्वनवीनविचारान् प्रकटयांबभूव । ततः सोऽकथयत्—मया कवितायाः क्षेत्रेऽपि केचन नवीनप्रयोगाः कृताः । वस्तुतः देहल्यां मया आधुनिककाव्यगतानां प्रवृत्तीनामध्ययनं कृतम् इति ।

अहं हिन्दीकाव्यस्य छायावादेन भृशं प्रभावितोऽस्मि । किन्तु छायावादस्य समयो गतः । अयं समयस्तु यद्वस्तु "नई कविता" इति कथ्यते तस्य अस्ति । सम्प्रत्यहं नवीनविधिभिः संस्कृतकविताः विरचयामि । पश्यतु भवान्, इत्युक्त्वा महाकविः स्वपरिधानसेवकादेकां ह्रस्वाकारां पुस्तिकां निस्सार्य मम हस्ते अर्पितवान् । तस्याः प्रथमपृष्ठे महाकवेः अभिनवे द्वे कविते लिखिते आस्ताम् । अहमपठम्—

"अनिश्चयः"

"घंघंघंघंघंघंघम्

खफछठथचटतव् -

ततः किं, ततः किं, ततः किम् ?"

एषा प्रथमा कविता आसीत् । द्वितीया कविता एवं लिखिता आसीत्—

---

१८. 'पायजामा' इति भाषायाम् ।

"निराशा"

"अ—ह—म्

भ

ग्न—

हृदयोऽस्मि ।

निराशोऽस्मि ।

मे हृदयस्य

आशा

वर्तते

वि

श्रृ

ङ्ख

ला ।"

अहमज्ञः महाकवेः कवितयोर्मर्म अवगन्तुं सर्वथा असमर्थः । ते पठित्वा किमपि मतं नाप्रकाशयम् । 'निराला'-प्रभृति हिन्दीकवीनां मुक्तच्छन्दोबद्धाः कविताः तु मया दृष्टा आसन् । किन्तु एतादृशी रहस्यमयी कविता प्रथमवारमेव दृष्टा । (पश्चाद् विज्ञातं यदेतादृशकवितानां सृजनमपि हिन्दीभाषायां सद्यः प्रारब्धमासीत् ।)

महाकविना अभाषि—"दृष्टं भवद्भिः ? विगतमासयोरेते द्वे एव कविते मया लिखिते । किन्तु एतयोरेव स्वकीयं समग्रजीवनदर्शनं मया प्रकटीकृतम् । एतयोर्मया नवीनमाध्यमानां भावाभिव्यक्त्यै समाश्रयोऽङ्गीकृतः । तथाहि—द्वितीयकवितायां "विश्रृङ्खला" इत्ययं शब्दस्तथा लिखितः यथा विश्रृङ्खलतायाः भावोऽभिव्यज्यते । वस्तुतः एते द्वे कविते विरच्य मया संस्कृते सर्वथा नवयुगस्य समारम्भः कृतः ।"

"किमत्रोच्यते ? सर्वथा युगकविः खलु भवान् ।"

(२)

एकसप्ताहानन्तरं पुनः महाकविना समागमः अजायत । तदानीं चतुर्थ-महानिर्वाचनस्य चर्चा प्रसृता आसीत् । महाकविरवदत्—"सतीशमहाभाग! अहमप्यस्मिन् महानिर्वाचने प्रत्याशित्वमङ्गीकरिष्यामि" इति ।

"भवानपि? साधु, शोभनोऽयं विचारः ।"

"अहं कांग्रेस्-दलस्य प्रत्याशी भविष्यामि ।" ततः सः सोत्साहं निर्वाचनविषये स्वविचारान् बहुकालं यावत् प्रकटयांबभूव ।

यदा महाकविः पुनः मिलितस्तदा तस्य वदनं महद्वेदनायुक्तं क्लान्तं चासीत् । अकथयत्सः—"पश्यतु भवान् सतीशमहाभाग! कीदृशमन्याय्यं वर्तते! एतैर्धूर्त्तकांग्रेसीयैः मत्कृते निर्वाचनस्वीकृतिपत्रं नैव दत्तम् । वस्तुत इदं कांग्रेस्-दलं सर्वथा भ्रष्टाचारस्य केन्द्रमिव सञ्जातम् ।"

"कोऽत्र सन्देहः । सर्वत्र सम्प्रति प्रसरति भ्रष्टाचारः!"

"अहं सम्प्रति साम्यवादेन भृशं प्रभावितः जातोऽस्मि । मार्क्सस्य विचारधारायाः प्रगाढमध्ययनं मया कृतम् । किन्तु अहं दलेषु सङ्घटनेषु च नैव विश्वसिमि । अहं स्वतन्त्ररूपेण निर्वाचने उत्थास्यामि ।"

तत्पश्चादेको मासो विगतः । किन्तु महाकवेर्दर्शनं मया न लब्धम् एकदा बहिष्टादागम्यमानमेकं स्वमित्रं द्रष्टुमहं सञ्चारकुट्टिमं गतः, महाकविं सपरिवारं सपरिच्छदं कुत्रचिद् गन्तुकामं तत्र दृष्टवान् । तस्य कनिष्ठपुत्रः दुग्धाय रोदिति स्म । तस्य माता तं भर्त्सयति स्म । अन्यांश्च पुत्रान् इतस्ततो भ्रमतः एकस्मिन् स्थाने स्थातुमादिशति स्म । मया पृष्टः महाकविरवदत्—"अरे किं भवान् नैव जानाति? मया स्वतन्त्रप्रत्याशिनः निर्वाचनस्वीकृतिपत्रं लब्धम् । मे निर्वाचनक्षेत्रं रायपुरनगरे अस्ति । अभितः खलु वर्तते निर्वाचनकालः । अतस्तत्रैव गम्यते मया यत्र मे अपर एकः श्यालो वसति । अहं तस्य गृहे वत्स्यामि । प्रचारकार्येऽपि सः मम साहाय्यं विधास्यति यतः स तत्र कोट्टपालः अस्ति ।" किञ्चिद् विरम्य सोऽवदत्—"मे निर्वाचन-चिह्नं गर्दभः अस्ति ।"

"गर्दभः ?"

"आः किमित्याश्चर्यतुन्दिलो भवान् भवति ? गर्दभः खलु शोषितवर्गस्य प्रतीकः । अद्य दरिद्रा अज्ञा सामान्यजनता किं गर्दभ इव नैव घृष्यते सन्ताप्यते च ? यथा गर्दभः समस्तान् मानवकृतानत्याचारान् निश्शब्दं सहते तथैव जनताऽपि । सामान्यजनता अपहृतसर्वस्वा कमपि प्रतीकारं वा विरोधं वा कर्तुं नोत्सहते । शोषकवर्गश्चानुदिनं तस्या रक्तं पेपीयमानः सुपुष्टतरः सञ्जायते । सा च बुभुक्षिता, अशिक्षिता, दीना, नग्ना, प्रतिक्षणं क्षीयमाणकलेवरैव तिष्ठति ! अतो निर्वाचनचिह्नरूपेण गर्दभं विधाय मया किमत्रानुचितं व्यवसितम् ?"

महाकवेर्वचो निशम्य चेतसि हसन्नपि सहसैव अहं मनाग् विषण्णमना अभूवम् । किं तस्य कथने सत्यता नासीत् ?

अत्रान्तरे रायपुरं गमिष्यन्ती बाष्पगन्त्री समागता । महाकविः स्वपरिच्छदादिकम् एकस्मिन् सम्पुटके संस्थापयितुं व्यवसितो बभूव ।

(३)

यथा यथा निर्वाचनदिनानि समीपमायान्ति स्म तथा तथा प्रचार-कोलाहलः प्रवर्धते स्म । अश्वयाने नरवाहने[१९] वा ध्वनिविस्तारकयन्त्राणि संस्थाप्य-"अमुकस्य कृते मतं दीयताम्", "गोहत्यापरायणकांग्रेस्-दलाय मतं मा दीयताम्"—इत्यादिकं घोषयन्तो जनाः दृश्यन्ते स्म । समाचारपत्राण्यपि निर्वाचनसम्बन्धिवृत्तैः सम्पूरितानि अविद्यन्त । एकदा एकस्मिन् समाचारपत्रे मया पठितम्—"विश्वस्तसूत्रैरज्ञायत यत् रायपुर (३) - निर्वाचनक्षेत्रस्य प्रत्याशी श्रीकण्टकः एकस्यां सार्वजनिकसभायां भाषमाणः कैश्चिदुद्दण्डश्रोतृभिः प्रस्तरवर्षेण शिरसि आहतः । स सम्प्रति नेहरुचिकित्सालये वर्तते । पुलिशकर्मचारिणः आक्रमणकारिजनानन्विष्यन्ति" इति ।

अथ भारतीयगणतन्त्रस्य चतुर्थमहानिर्वाचनं समाप्तमभवत् । विजयि-प्रत्याशिनो गर्विताः स्वमित्रैः सह भोजनपानादिगोष्ठीमकुर्वन् । पराजिताश्चाश्रूणि

१९. 'रिक्शा' इति भाषायाम् ।

प्रमार्ज्य आगामिनिर्वाचनं प्रतीक्षमाणास्तूष्णीमतिष्ठन् । मया समाचारपत्रे पठितम्—"रायपुर (३) - निर्वाचनक्षेत्रस्य विधानसभायै स्वतन्त्रप्रत्याशिनं श्रीकण्टकं पञ्चभिर्मतैः "जनसंघ"-प्रत्याशी श्री रामस्वरूपत्रिवेदी विजितवान्" इति महाकविः पराजयं प्राप्स्यतीति तु मयाऽप्यनुमितमासीत् । किन्तु केवलं पञ्चभिरेव मतैः! इदं किमप्याश्चर्यकरं वृत्तमासीत् ।

तस्मिन्नेव समये अहं रायपुरात् प्रकाश्यमाने एकस्मिन् समाचारपत्रे महाकवेरिच्छायाचित्रमवलोकितवान् । तदधस्तस्य परिचयोऽपि मुद्रित आसीत्—"अयं श्रीकण्टकशास्त्री अस्ति । अयं प्रख्यातराजनीतिज्ञरामस्वरूपत्रिवेदिना केवलं पञ्चभिर्मतैः पराजितः । त्रिवेदिमहाभागः विगतपञ्चवर्षेषु विधानसभासदस्यरूपेण कियद्भ्रष्टाचारमुत्कोचग्रहणादिकं च समाचरदिति तस्यानुचितकर्मभ्यस्ता सर्वा रायपुरजनता जानाति । स्वप्रेरणया स्पष्टवादिनमन्यायद्रोहिणं कण्टकमहोदयमेकस्यां सभायां आहूतं कारयित्वा अवैधसाधनप्रयोगेणायमस्मिन् निर्वाचने विजिग्ये । तथापि कण्टकमहोदयेनास्य मूलानि शिथिलीकृतानीति - निर्विशङ्कम् । श्रीकण्टकः भारतीयसंस्कृतेः समुन्नायकः संस्कृतस्य सुकविः विद्वानपि चास्ति । अनेन रासभं निर्वाचनचिह्नं विधाय शोषणपरायणनेतृणामुपरि गाढव्यङ्ग्यप्रहारः कृतः" इति ।

१९६७ तमवर्षस्य फेब्रुअरी-मासे रायपुरनभोवाणीसञ्चालकाः मां संस्कृतकाव्यपाठाय आमन्त्रयामासुः ।

कार्यक्रमान्निवृत्तस्य प्रतिगन्तुकामस्य मे मनस्याशयः सहसा उदभवत्—महाकविं समागम्य गन्तव्यमित इति ।

सः तदानीं नेहरुचिकित्सालय एव आसीत् । तत्र प्राप्तोऽहमेकस्मिन् कक्षे श्वेतशुभ्रास्तरणमधिशयानं महाकविमवालोकयम् । अवदच्च—"मया तु पूर्वमेव ज्ञातमासीद् यद् भवतां कविताया: आकाशवाणीतः ध्वनिक्षेपणं भविष्यति । तदर्थं भवानत्रायास्यति अहं च भवतां दर्शनसौख्यं प्राप्स्यामी"ति ।

मया अनुभूतं यन्महाकवेर्व्यवहारः पूर्वतः शालीनतरः सुसंस्कृतश्चासीत् । अहं श्वेतवस्त्रपट्टिकाभिर्बद्धमवलोक्य तस्य शिरः मदीयमनुतापमदर्शयम् ।

महाकविरवदत्—"अधुना काऽपि चिन्ता नास्ति । अचिरेणैव कार्यक्षमो भविष्यामि । अस्मिन् चिकित्सालये मत्कृते काऽपि बाधा नास्ति । एताः शुभ्रवस्त्रमण्डिताः "नर्स्" इत्याख्यातास्तन्वङ्ग्यः परिचारिकाः मधुरैर्वचोभिः प्रीणयन्ति माम । चिकित्सका अपि अत्रत्याः सुकुशलाः सज्जनाश्च । वस्तुतः अहमद्यत्वे नितरां सन्तुष्टोऽस्मि । मम गृहिणी अपि स्वचण्डीरूपं परित्यज्य विनम्रा मत्परायणा चाधुना सञ्जाता ।"

अहमवदम्—"निर्वाचने भवतां जयस्तु सुनिश्चित एव आसीत्। किन्तु भवतां प्रतिपक्षिभिरन्यायेनैवेतत् सर्वं कारितम् । भवद्भिरस्मिन् प्रकरणे कोऽप्यनुचित उपायो नावलम्बितः । अत एव...."

"अहो कियच्चारु वक्ति भवानपि !"—महाकविः स्वहृदये परमानन्द-पुलकमनुभवन्नाह—"भवांस्तु जानात्येव यदहं जनतायाः सेवकः अस्मि । सतीशमहाभाग ! विगतदिवसेषु मया प्रबलतया अनुभूतं यत् साधारणजनता अद्यत्वे स्वाज्ञानेन भृशं सन्ताप्यते स्वार्थपरायणनेतृभिः । अहमेतत्प्रतिद्वन्द्वितया उत्थास्यामि ।"—इति कथयतस्तस्य मुखमेकयाऽऽभयाऽऽलोहितमभवत्, अघोषयच्च-"अहं पराजयेन निराशो मनागपि नास्मि । सोऽपि समयः आगमिष्यति यदा अहं विजेष्यामि । एतदन्याय्यं, शाठ्यं, पाखण्डता वा कियच्चिरं चलिष्यति? सत्यमेव जयते" इति ।

लक्ष्मीलाञ्छनम्

भास्कराचार्यः त्रिपाठी एम० ए०

सूत्रधारः—

योऽसौ चतुर्दशजगद्बलयस्य कर्ता
यो भारतस्य दशजन्मसु भक्तभर्ता ।
कर्ताऽविताऽपि जगतः स्वयमेव हर्ता
पात्वेष वो व्रजभुवां रसिको विहर्ता ॥ १ ॥

भूयश्च मोमुद्यमानमानसाः सामाजिकाः सप्रश्रयं विज्ञाप्यन्ते, यद् वयं स्वदेशस्य साम्प्रतिकसमस्याम् अधिकृत्य, बालकविना कलाचार्येण भास्कराचार्येण त्रिपाठिना विरचितं, 'लक्ष्मीलाञ्छनम्'नाम रूपकं रूपयामः ।

(नेपथ्ये वीणावादनं रङ्गमध्ये च सश्रीकस्य विष्णोः प्रवेशः) ।

लक्ष्मीः—रमण! चक्रपाणे! किमिति विमनायसे? मुनेः नारदस्य कर्णम्पृणं वीणारणनमप्याकर्ण्य न ते ललाटतले परिलुठन्ती भङ्गुरा भ्रूलता विरमति । मां विलोक्यापि स्मितविरहितो रुषेव तवाधरः स्फुरति ।

विष्णुः—अयि मृषाप्रणयिनि लक्ष्मि! नाहं ते रमणः, न च त्वं मे रमणी । दीनबन्धोः विश्वम्भरस्य मम कर्मणि चौरवणिग्रमणीभूय त्वं प्रत्यूहीभवसि ।

लक्ष्मीः—नाथ! नात्र मामकीनो दोषः ।

भुवनभरणहेतोः सञ्चरन्ती सलीलं
जनमतिबलवन्तं रूपिणं वा विलोक्य ।
ननु यमभिसरामि स्वेच्छयाऽसौ जनो मां
झटिति पिहितपेट्यां पापबुद्धिर्दधाति ॥ २ ॥

विष्णुः—अत एव खलु लक्ष्मि! लक्ष्मलाञ्छिताऽसि, कमले! मलदूषिताऽसि । यदि लोकपोषकस्य राष्ट्रसर्वकारस्य सर्वात्मना सविधे भवसि तदैव जनार्दनेन मया समं रमस्व, न इतरथा मां कलङ्कपङ्कैरङ्कय ।

लक्ष्मीः—किन्तु करुणानिधे! केन मःकौलीनेन कोपितो भवान् इति विवित्सति चेतः।

विष्णुः—अये, किमेषाऽपि वार्ता प्रमदायाः तव न कर्णशष्कुलीमस्प्राक्षीत्। अस्मद्भक्तस्य भारतस्य भालभूतो हिमालयः चीनंचरणचूर्णितो वर्तते।

तुमुलमजनि जन्यं तत्र पारस्परीणं
सुतनु तुहिनशैले सर्पतां सैनिकानां।
द्विगुणितबलवद्भिस्ताडिता भारतीयैः
सपदि च बलहीना प्राद्रवच्चीनसेना॥ ३॥

न जाने केचन चीनसैनिकाः निहताः, यत् कतिपयमासेभ्यः प्राग् गंगायमुनाब्रह्मपुत्राणां नदीनां सलिलं लोहितीभूतम्।

लक्ष्मीः—तेनैव मन्ये, क्षीरोदन्वानपि किमपि रक्तायमानताम् अवाप। तर्हि...

विष्णुः—यद्यपि भारतस्य समीपे भूयसा प्रतिरक्षायै बलवैभवशेवधिः धार्यते। भगवान् रुद्रश्च चीनान् विनाशयितुं यतते, तथापि कुबेरमित्रेण भगवता रुद्रेण संदिष्टोऽस्मि, यदधुनाऽपि भारतस्य कतिपये व्यापारिणः लाभग्रहणद्रविणसञ्चयतो न विरमन्तीति लक्ष्म्याः दोष इति।

लक्ष्मीः—सत्यं पापाचारास्ते न विचारयन्ति, यत् पारवश्यतो निर्धनताऽपि वरीयसी।

(नेपथ्ये डमरुकवाद्यध्वनिः)

अये, कुतोऽयम् अकाण्डचण्डप्रलयपिशुनः पूरितरोदसीकन्दरोड्डामरो डमरुकनिनादः श्रवणं बधिरयति। पाहि माम्।

विष्णुः—प्रिये, अलं भीत्या। निर्दरमुदीक्षस्व, अयमेष स्वयमेव भक्ति-संभाजनीयो भुवनभर्ता भूतभावनो भगवान् भर्गः अभ्येति। तदभ्युत्थाय धन्यधौरेयताम् आत्मानमारोपयावः।

(शङ्करः प्रविशति)

शङ्करः—नमस् (इत्यर्धोक्ते)

विष्णुः—तुभ्यम् ।

शङ्करः—अयि रमेश! किमिति हेपयसि माम् । जगत्पालको भवान्, जगद्विनाशकस्य मम अग्रजः पूज्यश्च, तर्हि किमु प्रणामवाञ्छां विधुरीकरोषि । नाहं भवतो वरीयान् ।

विष्णुः—भगवन्, मैवम् । न केवलं वरीयान् भवान्, अपि तु वरिष्ठः ।
शिवस्त्वं जगत्पालकोऽसि प्रशान्तः स्वयं रुद्ररूपेण संहारकारी ।
पिता ब्रह्मणश्चासि हे देव शश्वज्जगत्पालको हारकः कारकश्च ॥ ४ ॥

शङ्करः—किन्तु केशव! कथमेवम् अनुत्तरदायित्वं द्योतयसि । ममालये हिमालये नीचनास्तिकाः चीनवासिनो वस्तुमीहन्ते । मदीयं मन्दिरं मन्दुरीकर्तुं वाञ्छन्ति । त्वं तु कमलकोमलकमलाकरतलाभ्यां निपीडितपादः सततं सुकोमलवेषे शेषे शेषे । तत्किं जगतः शेषे जागरितुकामोऽसि?

विष्णुः—भगवन्! ह्रीणोऽस्मि । यदा कादम्बिनीकदम्बककरम्बितवियति दुर्दिनतौ प्रावृषि चीनवासिभिः समाक्रान्तं, यदा तु हरिशयनीतः प्रारभ्य कार्तिकैकादशीं यावद् अहमस्वाप्सम् । देवोत्थानीतस्तु निरन्तरं भारतविजयाय उद्युक्तोऽस्मि । सति भवति विनतनिखिलनाकिनि पिनाकिनि न भवदालयं हिमालयं उच्छृंखला उच्छिन्नसच्छीलाः म्लेच्छाः चीनवासिनः स्प्रष्टुमपि शक्ताः ।

सरः कनकपङ्कजैर्विहृतमानसं मानसं
लतावलयसङ्कुला ललितदेवदारुद्रुमाः ।
निवासवसुधा सुधाशनवतां त्रयस्त्रिंशतः
सदा प्रभृति शोभिता भरतभूमिभागेऽभवन् ॥ ५ ॥

शङ्करः--सत्यमभिधत्से ।

विष्णुः--अथ कथयतु भवान्, कथं रणाङ्गणे प्राणपणेन सपत्नोत्सारणसमीरा अस्मद्भक्ताः भारतीयाः युयुधुः ।

लक्ष्मीः--मामपि श्रोतुमुत्कलिका विकलयति, यथातथं कथ्यताम् ।

शङ्करः--मुरारे! प्रथमतस्तु चीनाक्रमणमाकर्ण्य अपि शान्तस्वभावः श्रीगान्धिनोऽनुगामी भारतमण्डलाखण्डलो वर्तमानप्रधानमन्त्री न समरम् उररीचकार । यत् शोणितशोणधाराभिः क्षोणीक्षालनं व्यर्थम् । चीनवासिनोऽपि प्रतिवेशिबन्धव इति किमु तत्रत्याः सीमन्तिन्यो विधवीभूय क्रन्दनैः कण्ठकदर्थनं कुर्युः । अद्यावधि न स युद्धमजूघुषत् । सर्वेऽपि भारतीयाः तेन साकम् आमनन्ति यत्—

लतालावं लूना निखिलबलिनः कालकवले
पतन्ति क्ष्मा चेयं भवति निचिता क्लीबपुरुषैः ।
व्यवस्था लोकस्य प्रशिथिलतया नश्यतितमा-
महो युद्धं मूलीभवति भुवने सर्वविपदाम् ॥ ६ ॥

लक्ष्मीः--तत्कथं समरसम्भवः?

शङ्करः--भगवति कमले! मयैव निजभवनपराभवनमवलोक्य पुरा कुरुक्षेत्रे कुरुसेनेव चीनसेना विद्राविता । समस्ता भारतसेना रौद्रीबभूव । चीनसैनिककलेवराणि तथा सभुशुण्डयो भारतीयाश्चिच्छिदुः यथा धावत्कबन्धे युद्धक्षेत्रे हिमगिरिः गैरिकगिरित्वमाप । हिमाद्रेः निस्सरन्तीः गम्भीरनीरा रिङ्गत्तरङ्गभङ्गाहततीरा कलकलध्वनिधीरा धवला सुरधुनी अपि शोणितशोणा शोणीबभूव ।

लक्ष्मीः—तन्महेश्वर! भवतः शिरःकेशराशिरपि अरुण आसीदिति प्रत्येमि ।
शङ्करः—भगवति चन्द्रस्वसः! न केवलं चिकुराः, चन्द्रोऽपि रक्तचर्चितो बभूव ।

विष्णुः—कमले मूकीभव ! स्वभक्तभारतस्य गुणाकर्णनं किम् इतरवार्तान्तरायैः अन्तरयसि ।

शङ्करः—विष्णो ! किमन्यत्, अचिरादेव चीनसैनिकाः पलायिताः । अथ तत्राधुना महती विपत्तिः वरीवर्ति । अस्मत्सैनिकाः यान् यान् सलिलकल्लोलानिव लोलान् अरीन् मारंमारं दोलायोग्यान् अकार्षुः, तेषां चिकित्सामपि द्रविणदरिद्रोऽसौ देशो न चिकीर्षति । भूयोऽपि भारतीयवीरैस्ताड्यमानाः न जाने केचन चीनवाहिनीशाः पुरन्दरमन्दिरं, अपरे गिरिकन्दरं भेजुः । तेषां नवनीतकोमलकपोलाः लम्बबालाः बालाः लपनानि मलिनयन्त्यो भृशं रोदंरोदं सर्वानपि रोदयन्ति ।

लक्ष्मीः—अतिशयितं हि शूरायितं भारतस्य ।

विष्णुः—कथं न स्यात् । नात्र भरण्यभुजो भृत्यसैनिका अपि तु भीमभरतसुभाषसनाभयो भटाः ।

रामश्चेद्रावणारिर्बहिरपि जलधेर्देशकीर्त्तिं व्यतानीत्
कालाख्यश्चापि कृष्णो यवनमपहँरन्त्रासयामास विश्वम् ।
निस्त्रिंशैः शातधारैः सततमरिकुलं चन्द्रगुप्तोऽप्यजैषीत्
तद्देशीयास्तदद्य क्षतरिपुनिकरा किं न वीरा भवेयुः ॥ ७ ॥

लक्ष्मीः—अपि बुद्धगान्धिसधर्मिणो धर्मिणो भारतीया इति कथं नाभिधीयते भवता ?

शङ्करः—अदो भारतवैचित्र्यम्, अत्रत्या विषमजगन्मार्गाध्वनीनाः धैर्यधुरीणाः मनीषिणः प्रायः कुसुमसुकुमाराः, अवसरे च कुलिशकठोरा दरीदृश्यन्ते । अत एव तु बहवो वैदेशिका अपि अस्मच्चरितचन्द्रिकाचुलुकनचातकीभूतचेतसः साहाय्यकरणाय अहमहमिकया स्वान् समुद्धुरकन्धरीकुर्वन्ति ।

विष्णुः—तथ्यमाह मन्मथारिः ।

लक्ष्मीः--देव चन्द्रशेखर! तथाऽपि सदा सन्नद्धेन भवता भवितव्यम्। यतश्चीनो न सतां मतमनुमोदयति।

शङ्करः--इन्दिरे! निर्दरा भव। विनाशकाले एव ज्वालाजालजटालं ज्वलनमभिपततः चीनपतङ्गस्य पत्रस्फुरणं भवति। कालकवलिता तस्य शेमुषी न सतां सन्देशमनुसरति। चेद् भूयोऽपि चीनः समाचिक्रंसते, तर्हि समूलमुन्मूल्य परिपन्थिनमेनं परेतपतिपालितपुरीपान्थीभूतं विधास्यामि।

लक्ष्मीः--सत्यं पुरारिरसि।

शङ्करः--किन्तु मुरारिपुरंध्रि! त्वयाऽपि यतनीयम्। आग्राम्यनागरैः आविद्यार्थिविद्वद्भिः सर्वैरेव भारतीयैः राष्ट्रप्रतिरक्षायै समुपायनीकृतासि। तत्तु स्मारंस्मारं मन्मनो मोदान्नरीनर्ति। किन्तु कृपणाः वणिजः। न ते सम्यङ्मोहमुत्सृजन्ति। त्वमेव तानुत्सृज।

लक्ष्मीः—भगवन्! एवमेव करिष्यामि।

मां प्राप्यापि परोपकारकृपणा ये स्वार्थचिन्ताजुषः
फुल्लद्गल्लपिचण्डपोषणपरा दर्पं सदातन्वते।
तैः कोशेषु सुरक्षिताऽपि चपला गच्छामि निस्संशयं
ते धन्या ननु यैः परार्थघटकैः कीर्त्तिः कृता शाश्वती ॥ ८ ॥

विष्णुः—देव चन्द्रचूड! निसर्गचञ्चला कमलाऽपि अस्मत्साहाय्यं कर्तुकामा।

शङ्करः—जनार्दन! देवा लोकाश्च सर्वेऽपि भारतस्य वलक्षं पक्षम् अवलम्बन्ते। तद् ध्रुवं जयध्वनिभिः धरां ध्वनयन्तु भारतीयाः। हिमाचले तरङ्गायमाणाः धर्मचक्रचर्चिताः त्रिरङ्गवैजयन्त्यश्च आलोडयन्तु गगनप्राङ्गणम्।

लक्ष्मीः—अहो मन्मथमन्मथस्य निर्जितसजलजलदगर्जितैः जयजल्पितैः भीताः तदङ्गसङ्गिनः सर्वेऽपि सर्पाः नृत्यन्ति।

शङ्करः—रमे ! न मे शरीरस्था एव सर्पाः । तव तल्पकल्पो वासुकिरपि नृत्यति । ....अये, शृणु शृणु भाष्यभाषया शेषोऽपि कञ्चिद् वाचां प्रचारं चर्कर्त्ति ।

शेषः—देवि रत्नाकरतनये! भगवन्तौ मेशोमेशौ च । मदीया अपि आशिषो भारताय भवन्तु ।

आकैलासाद्रिसानोरयमतिविलसत्कीर्त्तिशाली स्वदेशो
यावत्कन्याकुमारीमविकलकलितः कल्पपर्यन्तमास्ताम् ।
प्रज्ञा वैज्ञानिकी नः प्रसरतु सततं शक्तिवृद्धयै समेषाम्
नीचश्चीनः प्रचञ्चत्ककचनिभमुजैर्भारतीयैर्जितः स्तात् ॥ ९ ॥

अपि च—

गङ्गा यावत् त्रिलोकीमतिविमलजलैः प्लावयन्ती पुनीते
शम्भोर्मूर्द्धानमूर्ध्वं धवलयति विधोरर्धलेखा च यावत् ।
तावत्सर्वैः समेत्य प्रचुरदलबलादारितारातिवर्गैः
दर्पाद्धोधूयमाना तुहिनगिरिवरे जृम्भतां वैजयन्ती ॥ १० ॥

॥ इति लक्ष्मीलाञ्छनम् ॥

श्रीपरकालसूरेः गाथाः*

अनु० श्री. श्रीनिवासाचार्यः

शिलैयिलङ्ग (8-1-1)

शार्ङ्गप्रभादीप्रपविर्दृढासिः
गदा लसच्छङ्ख इति ब्रुवन्ती ।
महाद्रिसाराहिभुजाश्च तस्य
चत्वार एवेति तु सङ्गिरन्ती ॥ १ ॥

कुचोल्लसद्वर्णविपर्ययानु-
गामिप्रियप्रेमयुताऽबलेयम् ।
प्रभोर्लसच्छास्त्रगिरां बुधानां
द्रष्ट्री भवेत्कृष्णपुरेशितुः किम् ॥ २ ॥

शेरुवरै (8-1-2)

युद्धयद्द्विषत्सङ्घविनाशनोऽयं
चापः करस्थो ह्यहहेति वक्त्री ।
नाशोद्यतक्ष्माधरपक्षभेदि-
चक्रं करेऽन्ये लसतीति वक्त्री ॥ ३ ॥

स्वतुल्यपुंसो भुवने ह्यभावा-
न्नाथासदक्षेति बत ब्रुवन्ती ।
विदीप्तनीलाचलवत्स्थितस्य
द्रष्ट्री भवेत्कृष्णपुरेशितुः किम् ॥ ४ ॥

सुन्नु मा मणि (8-1-3)

सुसङ्गतानर्घमणौ किरीटे
माला तुलस्या लसतीति वक्त्री ।
द्वे कुण्डले श्लाघ्यमणीन्द्रजुष्टे
प्रभोर्विदीप्रे इति हन्त सेयम् ॥ ५ ॥

---

* तिरुमङ्गैमन्नन - नाम्नो दिव्यसूरेः कृतिषु बृहत्सूक्तिग्रन्थे तिरुक्कण्णपुर-क्षेत्रस्थभगवद्विषया मधुरभक्तिप्रवृत्ता अष्टमशतकीयाः गाथाः ।

हैमो मणिस्यूतमहार्घहारो
वत्सेहि रम्ये लसतीति वक्त्री ।
किं कर्कशैस्सालवरैर्वृतस्य
द्रष्टी भवेत्कृष्णपुरस्य नेतुः ॥ ६ ॥

तारय (8-1-4)

संपुष्पितश्रीतुलसीद्विरेफ-
कृष्टाद्रिवक्षा इति सङ्गिरन्ती ।
युद्धयद्विपेन्द्रामलदन्तभङ्क्ता
पक्षीशवाहः प्रभुरित्यथेयम् ॥ ७ ॥

पश्यत्वमुं कोपि, नवप्रवाल-
तुल्योऽधरस्तस्य, बतेति वक्त्री ।
अजस्रकालाब्दनिनादितस्य
द्रष्ट्री भवेत्कृष्णपुरस्य नेतुः ॥ ८ ॥

अडित्तलमुम् (8-1-5)

फुल्लाम्बुजं पादतलं हि पाणि-
तलं तथैवेति बत ब्रुवन्ती ।
किरीटतद्दीप्रसुवर्णभूषे
यातो ममान्तःकरणान्न चेति ॥ ९ ॥

पद्मालया दीर्घशिताग्रनेत्रा
वक्षोगिरिस्थेति च सङ्गिरन्ती ।
मधुच्युतो दिव्यसुगन्धिपद्मैः
द्रष्ट्री भवेत्कृष्णपुरस्य नेतुः ॥ १० ॥

पेरायिरम् (8-1-6)

महानयं नामसहस्रवक्ता-
भूम्ना महांश्चेति बत ब्रुवन्ती ।
मनोज्ञरत्नाञ्चितकुण्डलोऽष्ट-
भुजाभिरामोऽयमिति ब्रुवन्ती ॥ ११ ॥

पयःप्रपूर्णोदरकालमेघ-
तुङ्गाद्रितुल्योऽयमिति ब्रुवन्ती ।
किं नीलकेदारजुषस्समन्तात्
द्रष्ट्री भवेत्कृष्णपुरस्य नेतुः ॥ १२ ॥

शेव्वरत्त (8-1-7)

संरक्तरम्यामलवाससोऽग्रे
सच्छृङ्खलं हैममिति ब्रुवन्ती ।
संरक्तपादद्वयहस्तयुग्मे
प्रफुल्लपद्मे इति सङ्किरन्ती ॥ १३ ॥

रूपं मणिश्यामलमम्बुदं किं
गारुत्मतं वेति च सङ्किरन्ती ।
करार्चिताग्निद्विजसंवृतस्य
द्रष्ट्री भवेत्कृष्णपुरस्य नेतुः ॥ १४ ॥

कोऱ्ऱप्पुळ् (8-1-8)

आस्थाय जैत्रं विहगेन्द्रमग्रे
भुवं समभ्येति ममेति वक्त्री ।
जैत्रस्य जिष्णोरपि जिष्णुना हि
तुल्यो महानेष इति ब्रुवन्ती ॥ १५ ॥

तद्वक्षसा चेदिह मेघसङ्गः
स्त्रीजन्मसाफल्यमिति ब्रुवन्ती ।
अधीतशास्त्रश्रुतिमद्वृतस्य
द्रष्ट्री भवेत्कृष्णपुरस्य नेतुः ॥ १६ ॥

वण्डमरुम् (8-1-9)

भृङ्गाश्रयश्रीवनमालिकाया
मौलौ सुगन्धो लसतीति वक्त्री ।
अस्मिन्मम प्रेमभरोऽधिकोऽतः
न जातु शक्नोमि विहातुमेनम् ॥ १७ ॥

पुरा प्रदृष्टोऽयमहो नु कस्मिन्
देशे मयेत्येव च हन्त वक्त्री ।
सन्द्रष्टृदत्तस्वकमानसस्य
द्रष्ट्री भवेत्कृष्णपुरेशितुः किम् ॥ १८ ॥

मावळरुम् (8-1-10)

मृगी विशालाक्षियुगा सुतेयं
तं मायिनं दृष्टवती बतेति ।
आरामगन्धावृतभूमिकृष्ण-
पुरेशितुश्रीकलि-वैरिणोक्ताम् ॥ १९ ॥

छन्दोमयीं द्राविडसूक्तिमालां
अधीयते ये खलु पञ्च पञ्च ।
ते फुल्लकल्पद्रुमशोभिदिव्य-
धाम्नि प्रशस्यः प्रभवो भवन्ति ॥ २० ॥

प्रथमदशकं संपूर्णम्

अथ द्वितीयदशकम्

तेळ्ळियीर् (8-2-1)

प्राज्ञो देवगणस्य देववृषभः पद्मालयार्हः पतिः,
शुभ्राचारसमन्वितस्त्वमसि भोः सन्तप्तहेमच्छविः ।
नृत्यन्नीरपरीतकृष्णनगरीं तां वन्दते, किन्न्वियं
धूर्ता हन्त! कराद्धृतिस्तु वलयस्यास्याः कथं युज्यते ॥ १ ॥

नीळ्निला (8-2-2)

सेयं सद्मशिरोगृहे स्थितवती संप्रेक्षमाणा दिशः,
भो भो पश्यत कृष्णपत्तनमिति प्रादर्शयत्तत्पुरम् ।
एतच्छिक्षणतत्परास्तु सुदृढा आर्या लसन्तीह यत्,
किं लज्जेत वधूरियं, मधुपुरी नेतुस्तृषा पूरिता ॥ २ ॥

अरुवि शोर् (8-2-3)

कीर्णो निर्झरवारिणा वृषगिरि, स्तोयाद्रिरित्यब्रवीत्
रम्यस्सत्यगिरिः कुतस्त्य इति भो! पृच्छन्त्यसौ वर्तते ।
ऋद्धयत्सर्वगुणाढ्यकृष्णनगरं प्रोच्य द्रवीभूय च
सैषान्तश्शिथिला भृशं भवति है एतत् कुतो वा कथम्॥ ३॥

उण्णु नाळ् (8-2-4)

अस्या नास्ति च जक्षणार्हदिवसो, नैवास्ति निद्रा तथा,
स्त्रीत्वेनापि च पूर्णतां नहि गता, मुग्धैव संप्रत्यपि ।
श्रीकृष्णावसथं तु कृष्णनगरं तद्वन्दते, श्यामला-
म्भोधेस्तुल्यवपुष्यसौ सुनिहितस्वान्तातिचित्रन्त्विदम् ॥ ४ ॥

कण्णनूर् (8-2-5)

कृष्णस्यावसथं हि कृष्णनगरं नम्रा त्वियं सुन्दरी
पत्याश्लेषरुचिं स्वकीयचरितं तथ्यं स्वयं शंसति ।
भुक्त्वा नव्यघृतं स्वमातृकरतो बद्धा भृशं ताडने
प्रोक्तेऽस्या वपुषश्छविस्त्यजति भोः! स्वर्णस्य सच्छायताम्॥५॥

वडवरै (8-2-6)

रम्यं ह्यौत्तरवेङ्कटाद्रिशिखरं त्यक्त्वा वयं त्वागता
वस्तुं कृष्णपुरे भृशं सुरुचिरे त्वद्येति वक्ति स्वयम् ।
भव्या मुग्धतमा मदीयदुहिता, किंवाऽनयैतत्कृते
कर्तुं युक्त, मनेन सुग्निहरणं त्वस्याः कथं युज्यते ॥ ६ ॥

तरङ्गनीर् (8-2-7)

घुष्टे वारिनिधेस्तरङ्गनिचये तप्ते हिमांशावपि
किं वेयं बिभियादहस्सु बहुषु क्लिष्टा ह्यमीभिः पुरा ।
भीकृत्केशितुरङ्गमास्यदलनं कृत्वा प्रहृष्टस्य तत्
रङ्गाख्यो निलयः पुराणतम इत्यस्यास्तु तृष्णाधिका ॥ ७ ॥

तोण्डल्लाम् (8-2-8)

भक्तास्त्वच्चरणौ प्रणम्य सकला उज्जीवनं प्रापिताः
दृष्ट्वैतद्भुवि कृष्णपत्तनमसौ नन्तुं ह्ययासीत्पुरा ।
मुग्धा मद्दुहितालिकीर्णकबरीभारा अमुष्या वपु-
श्शोभायाहरणादनीतिकरणं किं युज्यतां भो! स्वयम् ॥ ८ ॥

मुळ्ळेयिरु (8-2-9)

नोद्भिन्ना रदनाङ्कुरास्सुविमलाः, कैश्यं न बन्धक्षमं
नैवानाविलबुद्धिताकृतमहाख्यात्या युतेयं बत! ।
कीर्णं कृष्णपुरं मरन्दभरितैर्वृक्षैर्नमत्यर्भके
स्वीयापत्यमितीह हन्त! धिषणां को वा प्रकुर्याद्भुवि ॥ ९ ॥

कार्मलि (8-2-10)

मेघौघावृतकृष्णपत्तनलसन्मत्स्वामिनं प्रत्यहो
भूमिव्याप्तयशोनिधेः कलिजितो मङ्कापुरस्वामिनः ।
सूक्तं द्राविडसूक्तिरत्नदशकं येऽधीयते मानवाः
ते पाथोधिपरीतसुक्षितितले भ्राजन्ति पूर्णास्सदा ॥ १० ॥

द्वितीयदशकं संपूर्णम्

अथ तृतीयदशकम्

करैयेडुत्त (8-3-1)

रेखावतो ध्वनवतो वरशङ्खवर्गान्
वल्लीततीश्च विततान्नवविद्रुमाणाम् ।
तीरं तरङ्गनिचयैस्समुपानयद्भिः
नीरैर्वृते रुचिरकृष्णपुरे स्थितस्य ॥ १ ॥

दाम्ना सुगन्धितुलसीरुचिरेण दीप्तौ
बाहू विचाल्य सुदृढौ वरशैलसारौ ।
शैलं समुद्धृतवतो महतः कृतेऽहं
हीनाऽभवं रुचिरकङ्कणभूषणेन ॥ २ ॥

अरि विरुदु (8-3-2)

श्यामेन मेघनिचयेन महीधरस्य
धूमेन चाप्यगुरुणो भवनोत्तमस्य ।
दुर्ग्राह्यभेदमणिहर्म्यचयेन रम्ये
श्रीकृष्णपत्तनवरे, लसतस्तु नित्यम् ॥ ३ ॥

रेखासुदीप्रफणभृच्छयने प्रसुप्य
क्रूरालपद्दक्कुटिलमत्तमदावलेन्द्रम् ।
संप्राप्य भाग्य रदनद्वितयापहर्तुः
भर्तुः कृते मुषितकङ्कणभूषणास्मि ॥ ४ ॥

तुङ्ग मा (8-3-3)

उत्तुङ्गरम्यमणिसंहतिनिर्मितोरु-
सौधाग्रदीर्घशिखरैर्दिवि गच्छतोर्हि ।
शीतांशुमण्डलमहाम्बुभृतोश्च कुक्ष्योः
सन्दारके महति कृष्णपुरे स्थितस्य ॥ ५ ॥

क्रूरेक्षणातिमहदुक्षततीर्विनाश्य
शीतांशुशोषमुपशाम्य च मोदभाजः ।
वात्सल्यलोहितदृशः खलु मत्प्रियस्य
नेतुः कृते मुषितकङ्कणभूषणास्मि ॥ ६ ॥

कणं मरुवुम् (8-3-4)

नृत्यन्मयूरगणवत्यभितस्सुगन्धि-
वृक्षैर्वृते विपुलवीथिकया समेते ।
दार्ढ्यप्रपूर्णवरसालवरैरुपेते
श्रीकृष्णदिव्यनगरे सततं स्थितेन ॥ ७ ॥

पुष्पातिगन्धिभुजगोपवधूकराभ्यां
बन्धं ह्युलूखलवरे समवाप्य गत्वा ।
श्लिष्टार्जुनद्रुयुगळं प्रसभं प्रभज्य
चङ्क्रम्यता मुषितकङ्कणभूषणास्मि ॥ ८ ॥

बायेडुत्त (8-3-5)

स्वास्योत्थताररवमन्त्रवरैर्द्विजेन्द्रैः
संवर्ध्य हव्यनिवहैर्ज्वलनं स्वकीयाः ।
तास्ताः क्रियास्सुविहिताः प्रविरच्य वेद-
रक्षापरैर्लसति कृष्णपुरे स्थितस्य ॥ ९ ॥

अम्बागृहीततनुकाण्डनिरीक्षणोत्थ-
भीत्या पलाय्य दधि चर्वितमास्यलग्नम् ।
सर्वत्र लेपितवतो लपनेर्भकस्य
नेतुः कृते मुषितकङ्कणभूषणास्मि ॥ १० ॥

मडलेडुत्त (8-3-6)

दीर्घैर्दलैः प्रविततायतकेतकीनां
पर्यन्तभूमिषु समुन्नतसैकतासु ।
वृद्धाः प्रवाललतिकानिचयास्तु यत्र
दीप्ता विभान्त्यहह! कृष्णपुरे हि तत्र ॥ ११ ॥

विभ्राजतो युधि विमृद्य तदा हिरण्यं
कृत्वा विनष्टबलमात्मनखैस्सुरम्यैः ।
वक्षो विघाट्य जगतामुपकारकर्तु-
र्भर्तुः कृते मुषितकङ्कणभूषणास्मि ॥ १२ ॥

बण्डमरुम् (8-3-7)

भृङ्गानुविद्धसुमकेसरशाखिनील-
च्छायासु यत्र विमलोदकवीचिनुन्नाः ।
पुञ्जीभवन्ति नवमौक्तिकराशयोऽद्धा !
तस्मिंस्तु कृष्णनगरे समवस्थितस्य ॥ १३ ॥

अष्टौ दिशो जलनिधीनपि सप्त, पृथ्वीं
दीर्घां विशालतमविष्णुपदं निगीर्य ।
सर्वं स्वकीयमुखतोद्गिरतस्समक्षं
नेतुः कृते गलितभास्वरकङ्कणास्मि ॥ १४ ॥

कोङ्गमलि (8-3-8)

गन्धप्रपूर्णवरनीलसरोरुहाख्य-
नेत्रा जलाशयवरा विमलास्तु यत्र ।
रक्ताम्बुजाख्यवदनानि विकासयन्ति
श्रीकृष्णदिव्यनगरे वसतस्तु तत्र ॥ १५ ॥

नौकालिकीर्णविपुलार्णववारिमध्ये
रेखाभिरामफणितल्पजरम्यतल्पे ।
सुप्तस्य रक्तकमलाश्रयनाभिभाजो
नेतुः कृते मुषितकर्कशभूषणास्मि ॥ १६ ॥

बाराल्गुम् (8-3-9)

चोलापिनद्धसुकुमारकुचातिदीर्घ-
वृत्ताग्रथवेणुसमबाहुविभूषितायाः ।
स्त्रीत्वैकतानगुणपुञ्जजुषो रमायाः
आवासशैलनिभवत्सजुषो विनेतुः ॥ १७ ॥

श्रीकृष्णपत्तनजुषो महतस्सहस्र-
नामस्तवार्हसमसङ्ख्यफणाभिरामे ।
नागाधिराजशयने स्वपतः परस्य
भर्तुः कृते मुषितकङ्कणभूषणास्मि ॥ १८ ॥

तमरुवु (8-3-10)

क्षौद्रच्युताऽतिरमणीयतरुव्रजेन
कीर्णे हि कृष्णनगरे सततं वसन्तम् ।
उद्दिभ्यवामनमुदग्रवाङ्धिकीर्ण-
क्षेत्रालिसंवृत-वरालिपुरस्य नेत्रा ॥ १९ ॥

हन्त्रा कलेस्सततवाञ्छितवैष्णवश्री-
भाजा, कृपाप्रकटितोक्तिमयीं हि मालाम् ।
जिह्वाग्रगामिह विधाय मुदा प्रवक्तुः
दूरात्प्रयान्ति सकलान्यपि किल्बिषानि ॥ २० ॥

मनोबोधः—उत्तरार्धः

(श्रीसमर्थरामदासस्वामिविरचितः)

अनुवादकर्ता-विश्वनाथ केशव छत्रे

क्रियाहीनवाचालता निष्फलैव

१०३ सदा कीर्त्यतां राघवः सानुरागं मनः ! कीर्तने लुप्यतां देहबुद्धिः ।
परस्त्रीपरार्थाभिलाषश्च हेयः, त्वया भद्र ! जीवार्पणेनापि काले ॥

१०४ क्रियाहीनवाचालतां नैकरूपां सदाऽतीव निर्भर्त्सयत्यन्तरङ्गम् ।
सदा स्वैरसंकल्पसंसक्तचेताः कथं प्राप्नुयाद् मानवो विश्वनाथम् ॥

१०५ विवेकेन हित्वा क्रियां गर्हणीयां, विशुद्धां सदैवानुतिष्ठादरेण ।
सदा तात ! वर्तस्व भाषानुसारं, भवार्तिप्रदां कल्पनां रे ! जहीहि ॥

विवादान्तकारी हि संवाद इष्टः

१०६ कुरु स्नानसन्ध्यादिकर्मैकनिष्ठं विवेकेन च भ्रंशनात् स्वं नियच्छ ।
नरो भूतमात्रे दयास्नेहयुक्तो हरेर्भक्तितः शान्तिमन्तः प्रयुङ्क्ते ॥

१०७ मनो रुध्यतां क्रोध उद्भूतमात्रो मनो ! धार्यतामादरः साधुसङ्गे ।
मनस् ! त्यज्यतां दुष्टपापिष्ठसंगो मनो !ऽवाप्यतां तात ! मोक्षाधिकारः ॥

१०८ मनो ! नित्यसंगाद् अरे ! सज्जनानां क्रिया ते विशुद्धयेत जायेत भक्तिः ।
निवर्तस्व रे ! निष्क्रियोक्तेः सुशीघ्रं विवादान्तकारी हि संवाद इष्टः ॥

१०९ विवादो वृथा सर्वथा प्रोज्झितव्यः सुखान्तश्च संवाद एवावलंब्यः ।
मनः ! सर्वदा शोकसंतापहारी विवादान्तकारी हि संवाद इष्टः ॥

११० नयेद्वादमन्तं स संवाद उक्तो जयेत् स्वामहंतां विवेकप्रभावात् ।
अहंताढ्यवादो विकारोद्भवाय विवादान्तकारी हि संवाद इष्टः ॥

१११ मया ते हितायैव वक्तव्यमेवम्-मनः ! सत्यमन्विष्यतां स्वं हितं च ।
हितायोद्धतं प्रोज्झ पाखण्डमेनं विवादान्तकारी हि संवाद इष्टः ॥

११२ गतं भाषणैरायुराकर्णनैश्च विवादस्तु तस्थौ यथापूर्वमेव ।
मनो ! दाम्भिकः संशयोत्पादि-वादो विवादान्तकारी हि संवाद इष्टः ॥

११३ अहंताबलाद् हन्त ! विद्वद्वरेण्याः कियन्तो गता ब्रह्मरक्षःशरीरम् ।
परेशान्मनः ! कोऽधिको नाम विद्वांस्त्वया द्रागहन्ताविहीनेन भाव्यम् ॥

११४ मनो ! मौखिको ब्रह्ममायाप्रपञ्चः किमर्थम् ? स तु प्रत्यहं गर्ववृद्धयै ।
क्रियाहीनवाचालता निष्फलैव विचार्येति सत्यं स्वयं मृग्यतां तत् ॥

११५ विवादान्तकारिस्थले ब्रूहि नित्यं विवेकादहन्तां सुकार्ये नियुङ्क्ष्व ।
सदावर्तनं तेऽस्तुभाषानुसारं पथा गच्छ भक्तेश्च शुद्धक्रियाभिः ॥

११६-१२५ स नोपेक्षते भक्तभीशः कदापि - प्रकाशितः पूर्वमेव ।
सत्सङ्गे राममक्तिः, राघवस्य पन्थाः निर्गुणबोधश्च ।

१२६ भुवं सादरं योऽवतीर्णः सलीलं, ह्यनेकेषु वेषेषु भक्तावनार्थम् ।
न तं येऽभिजानन्ति सर्वेश्वरं ते दुरात्मान उग्राः खलाः पापरूपाः ॥

१२७ सुधन्यः स यो राघवध्यानयोगात् प्रशान्तोऽन्तरे, तन्मयस्तत्कथायाम् ।
गतो रामबोधेन यद्देहभावो विलीना च यद्वासना रामरूपे ॥

१२८ मनो ! वासना वासुदेवेऽस्तु सर्वा मनः ! कामना माऽस्तु ते कामसङ्गे ।
असत्यां मनः ! कल्पनां माऽऽश्रयस्व, मनः ! सज्जन! न्युष्यतां साधुसङ्गे ॥

१२९ सुगत्यै सतां सङ्गतिर्ह्यत्यवश्या तया दुर्मतिः सन्मतित्वं वृणोति ।
अनङ्गः स कामः खलो वञ्चकश्च ततो रे! त्वया निर्विकारेण भाव्यम् ।

१३० कुसङ्कल्पलेशोऽपि हेयः सदैव मनः सत्यसङ्कल्प एवावलम्ब्यः ।
जहीह्यञ्जसा जल्पनं निष्फलं च रमाकान्तमेकान्तकाले भजस्व ॥

१३१ मनो! भक्तियोग्यस्त्वसौ राम एकः, प्रसिद्धो भुवि ह्येकबाणैकशब्दः ।
जनोद्धारकर्त्री क्रिया दृश्यतेऽस्य विवेकं जना! राघवस्याश्रयध्वम् ॥

१३२ विचार्यैव यो भाषते वर्तते च भवोत्तापशान्त्यै सदा तस्य सङ्गः ।
न भाषस्व सम्यग्-विमर्शं विना भो.! सदा भाषणं वर्तनं तेऽस्तु शुद्धम् ॥

१३३ विरक्तश्च विज्ञानवानीशभक्तः कृतो निश्चयो येन च स्वात्मबोधे ।
सुपुण्यं हि तद्दर्शनस्पर्शलभ्यं तदीयः सुबोधश्च शङ्कापहारी ॥

१३४ अहङ्कारशून्यश्च नित्यं विरक्तो दयाशान्तियुक्तः क्षमी नित्यदक्षः ।
अलुब्धश्च यः क्षोभदैन्यप्रमुक्तो मनो! ऽसावभिज्ञायतां योगिराजः ॥

१३५ मनः! सेव्यतां भद्र! सत्सङ्गतिः सा निवर्त्यांशु या दुर्मतिं स्वप्रभावात् ।
सुमार्गं प्रति प्रेरयत्यादरेण भियापेति यस्याः करालोऽपि कालः ॥

निधिर्ज्ञायतेऽहंतया नो पुराणः

१३६ भयव्याप्तमेतद्धि विश्वं समस्तं भयातीतमानन्दमास्वादयस्व ।
तदालोकनान्नश्यति द्वैतभावः प्रमुक्तस्ततो निर्भयत्वं प्रभुङ्क्ते ॥

१३७ हितं बोधितं साधुभिः स्पष्टशब्दैः स्थितः पूर्ववन्मन्दबुद्धिस्तु लोकः ।
विहातुं न देहात्मबुद्धिं क्षमोऽसौ निधिर्ज्ञायतेऽहंतया नो पुराणः ॥

१३८ अलभ्यं भ्रमाद् भूनिखातं हि वित्तं तथा जन्मदैन्यं गतो जीव एषः ।
न संत्यज्यते निश्चयो देहबुद्धेर्निधिर्ज्ञायतेऽहंतया नो पुराणः ॥

१३९ स्थितो विश्वतो विश्वनाथः स नूनं शिलां मन्यते दुर्भगस्तस्य मूर्तिम् ।
न पुण्यं समाप्नोति नाभावहीनो निधिर्ज्ञायतेऽहंतया नो पुराणः ॥

१४० निधेर्वञ्चितः संनिधिस्थात् स्वकीयान्निबद्धो गुणैर्दुःखमग्नः स जीवः ।
क्षमो लङ्घितुं तत् त्रयं[1] न स्ववृत्त्या निधिर्ज्ञायतेऽहंतया नो पुराणः ॥

१४१ अतो ज्ञानिसाधुं जनेऽन्विष्य तस्य दृढं धार्यतां पादयुग्मं कृपार्थम् ।
विना सद्गुरोरञ्जनं सर्वथैव निधिर्ज्ञायतेऽहंतया नो पुराणः ॥

१४२ न तज्ज्ञायते, ज्ञायते नात्मरूपं ह्यहंता न विस्रंसते स्रंसते न ।
हृदो हन्त! नापैति नापैति शङ्का विनातिश्रमैर्नाप्यते नाप्यते तद् ॥

१४३ नरो नाभिजानाति मायाभ्रमाद्यद् हितात् सर्वथा वञ्च्यतेऽसौ स्वकीयात् ।
परीक्षां विनोद्दीप्तमायाविमुद्रां कटौ संनिबध्नन्निवैषोऽतिमूढः ॥

---

१. गुणत्रयं - सत्त्वं, रजः तमश्च ।

मनोऽनन्तसद् मृग्यतां तत् प्रयत्नैः

१४४ जगत्यस्ति किं सत्यमित्यादरेण मनोऽन्विष्यतां सर्वशक्त्यप्रयत्नैः ।
मनो ! ऽस्मिन् प्रयासे प्रतीयेत देवो भ्रमाज्ञानशङ्कातमः स्यान्निरस्तम् ॥

१४५ सदा चिन्तयन्निन्द्रियार्थानहंताऽऽवृतो जायते जन्तुरज्ञानयोगात् ।
विवेकेन सम्प्राप्नुयाद् रे ! स्वरूपं ततो नैव जीवः पुनर्जन्म याति ॥

१४६ इदं दृश्यमानं न जीवेच्चिराय भिनत्ति ह्यकस्मात् स कालः समूर्तम् ।
विनंक्ष्यत्यशेषं च काले समस्तं मनो ! ऽनन्तसद् मृग्यतां तत् प्रयत्नैः ॥

१४७ न तच्छिद्यते भिद्यते निर्विकारि जगद्व्याप्यगम्यं ह्यहंभावयोगात् ।
क्षमं तन्न सोढं मनाग् द्वैतभावं मनो ! ऽनन्तसद् मृग्यतां तत् प्रयत्नैः ॥

१४८ निराकार आधारभूतो विधेर्यस्तथेशान्तराणामगम्यः श्रुतीनाम् ।
सखे ! तेन सार्धं त्वयाप्तव्यमैक्यं मनो!ऽनन्तसद् मृग्यतां तत् प्रयत्नैः ॥

१४९ न शक्नोति यत् प्रेक्षितुं चर्मचक्षुर्न यस्य द्युतिं मृष्यति ज्ञानचक्षुः ।
यदीक्षाक्षणे लुप्यतीक्षाक्रियैव मनो!ऽनन्तसद् मृग्यतां तत् प्रयत्नैः ॥

१५० न पीतं, न नीलं, सितं श्यामलं वा, न तद् व्यक्तमव्यक्तरूपं न नूनम् ।
सविश्वासभक्त्या सुलभ्यं पदं यद्, मनो!ऽनन्तसद् मृग्यतां तत् प्रयत्नैः ।

समाधानसौख्यं सतां सङ्गतेन

१५१ मनो! मार्गणाद् मार्गणात् सत्यबोधो, मनो! बोधनात् बोधनात् सत्यलाभः ।
समस्तं त्विदं सङ्गतेः सज्जनानां, स्थिरान्निश्चयात् सा च लभ्यानुरागात् ॥

१५२ वृथा चातुरी शाब्दिकज्ञानबोध-क्रियायां, हि तन्निर्णयोऽन्तस्त्ववश्यः ।
मनस्! तत्त्वसारं स्थितं ह्यन्यदेव, समस्तेष्वनुस्यूतमत्युत्तमं च ॥

१५३ नरे! पिण्डतत्त्वादिविज्ञानतो वा, न नीतेः पटुत्वात् समाधानसौख्यम् ।
न वा योगयागैर्न वा त्यागभोगैर्मनस् ! तत् परं साधुसङ्गेन लभ्यम् ॥

१५४ यथाऽऽलक्षते प्रोज्झ्य निर्दिष्टशाखां, दिदृक्षुर्नभोमण्डले तं नवेन्दुम् ।
विहाय श्रुतं साधुसङ्गे तथैव, महावाक्यतत्त्वादि पश्येत् स्वरूपम् ॥

१५५ तदन्विष्यतां दृश्यते यन्न लोके, मनस्! तद्धि साधो! निगूढं नितान्तम्।
करग्राह्यतां नेति तद्धोः! कदापि, जगद्व्याप्नुवच्चापि नाऽऽकल्यते तत्॥

मनः! स्थीयतां प्रोज्झ्य सर्वामहंताम्

१५६ प्रशंसन्निजज्ञानितां मूर्ख एव, ह्यतर्क्यं प्रभुं तर्कयेत् को जगत्याम्।
सहाहंतया लक्षितुं तं त्वशक्यं, तमालक्षमाणस्तदैक्यं समेति॥

१५७ गवेषार्हशास्त्राणि नैकानि नूनं, परं धारयन्त्यैकमत्यं न तानि।
कलिं कुर्वते स्वस्वशास्त्राभिमानात् प्रवीणाः, ततो रुध्यते ह्यात्मबोधः॥

१५८ मनो! न्यायतर्कादिशास्त्राणि वेदाः, श्रुतिश्च स्मृतिर्भिन्नमार्गान् दिशन्ति।
स्वयं ह्येष मौनं समेत्य स्थितोऽसौ, मनः! स्थीयतां प्रोज्झ्य सर्वामहंताम्॥

१५९ अहंताकृतिं मक्षिकां भक्षयित्वा, रुचिः स्याद् महाबोधनास्वादने किम्।
अहंता न यन्मानसात् सम्प्रणश्येत्, तदन्तः प्रपच्येत न ज्ञानबोधः॥

१६० मनो! ऽलं विषादान्तवादेन तावत्, विकारप्रसू-भेदबुद्ध्या कृतं च।
मनो! मा सखे! बोधयान्यांस्तु तावद्, न यावत्तव स्यादहंता विलुप्ता॥

१६१ अहंता सदा दुःखमेव प्रसूते, क्रियाहानिबोधः फलं नातनोति।
सुखं त्वान्तरं सर्वसौख्यं प्रदत्ते, विमृग्य व्यपोह स्वयं तामहंताम्॥

१६२ विवेकी नरोऽहंतयापैति नीतेः, अनीत्या च स श्लाघ्यतामेति लोके।
परं सोऽन्तराप्नोति[1] सम्यक् प्रतीतिं यदाचार आलंबितोऽस्त्यप्रमाणः॥

सत्संगे देहबुद्धिः आत्मबुद्धौ परिवर्तयितव्या

१६३ प्रसक्तो दृढं निश्चये देहबुद्धेः सुखाद् वञ्च्यते ना स्वदेहादतीताम्।
परीवर्त्य बुद्धिं तनोरात्मबुद्धौ, सदाश्रीयतां संगतिः सज्जनानाम्॥

१६४ मनः! कल्पितस्त्यज्यतामिद्रियार्थो, ह्यभिज्ञायतां निर्गुणो देव एकः।
मनः! कल्पना रुध्यतां प्रोत्थितैव, सदाश्रीयतां संगतिः सज्जनानाम्॥

---

१. अन्तर्मनसः बोधनात्

१६५ वहन् देहगेहादि चिन्ताऽखण्डं, नरोऽत्यन्तलुब्धो हितं स्वं हिनस्ति ।
हरिं चिन्तयन् मुक्तिकान्ता वृणीयात्, सदाश्रीयतां संगतिः सज्जनानाम् ॥

१६६ अहंता प्रवृत्ता स्वदेहात् प्रवृद्धा, प्रियापुत्रमित्रादिमोहाद्, भ्रमाय ।
त्यजैनां द्रुतं जन्ममृत्युप्रमुक्त्यै, सदाश्रीयतां संगतिः सज्जनानाम् ॥

सगुणनिर्गुणातीतं शुद्धस्वरूपम

१६७ मनः! शाश्वते स्थातुमाद्यात्मरूपे, सखे! निश्चिनु द्राग् व्यपोह्य स्वशङ्काः ।
हितार्थं क्षणो युज्यतां सर्व एव, सदाश्रीयतां सङ्गतिः सज्जनानाम् ॥

१६८ स्ववृत्त्यात्मरूपे स्थिरं विद्धि साधुं, य आशाविहीनत्वयोगाददीनः ।
मनो! [1]बन्धनं वर्धयन् देहबुद्धिं, कथं सज्जनोपद्रवाय क्षमेत ? ॥

१६९ सतामग्रतोऽनन्तपृच्छां विदध्यान्निरस्येदहंतां प्रविस्तारितां च ।
अशेषस्मृतिं देहबुद्धेर्विलोप्य, मनश्! चिन्त्यतां निर्गुणं शुद्धतत्त्वम् ॥

१७० त्यजेदात्मबोधेन रे! देहबुद्धिं, विवेकेन संप्राप्यतां वस्तु तच्च ।
न वृत्त्या स्थिरीभूयते ब्रह्मणीति, तदेवानुसन्धीयतां सर्वकालम् ॥

१७१ मनश्! चर्मचक्षुष्पथात् सर्वसारं, सुगुप्तं, स आभास ईक्षापथे यद् ।
न चाऽऽकल्यते तद्गुणाभासशून्यं ह्यहंतागुणात् कल्पनाया अगम्यम् ॥

१७२ मनो! द्योतयन्तीन्द्रियार्थांस्त्ववित्रा सुवित्रा च सा ब्रह्मबोधोपकर्त्री ।
द्विरूपास्ति सा कल्पना ; निर्मलान्ते, विवेकेन संलीयते ब्रह्मरूपे ॥

१७३ अहंकारराहुः स्वरूपोत्थितोऽसौ, स्थितो व्याप्य तद् ब्रह्मरूपान्तरिक्षम् ।
दिशो ध्वान्तमेघावृता दुर्निरीक्ष्या, विचार्याप्यतां ब्रह्म तद् रे ! विवेकात् ॥

१७४ न शक्नोति यं लक्षितुं चर्मचक्षुर्-अशेषं भवं यश्च पश्यत्यरुद्धम् ।
ददात्येष नूनं क्षयातीतमोक्षं, सदा भक्तपक्षानुकूलश्च दक्षः ॥

---

१. अनावश्यं सांसारिकम् उदा० धूमपानादि व्यसनानाम् ।

देवाधिदेवः - केवलं ब्रह्म

१७५ विधात्रा विधिर्लिख्यते सर्वभाले, विधिस्तद्विधातुर्ललाटे तु केन।
जगद् दह्यतेऽन्ते समस्तं हरेण, हरोऽसौ परं दह्यतेऽन्ते तु केन॥

१७६ अथ द्वादशार्काश्च रुद्रा दशैकाः, अगण्या असंख्याकशक्ताश्च नूनम्।
स सर्वेश्वरः कीदृशः कस्तथेति, विना सश्रमान्वेषणाज्ज्ञायते न॥

१७७ न विच्छिद्यते भिद्यते देवराजः, स्थिरो निश्चलो दैन्यहीनो बलिष्ठः।
अहंताप्रभावात् क्षमं नेक्षितुं तं, सखे! चर्मचक्षुः; स तिष्ठत्यगम्यः॥

१७८ प्रियो यस्य यः सोऽर्च्यते तेन देवः, परं कोऽपि नान्विष्यतीशं तमेकम्।
अहो! कोटिशो दृक्पथं यान्ति देवाः, प्रिया यस्य या ह्युत्तमा सैव भक्तिः॥

१७९ त्रिलोकी यतो निर्मिता तं यथार्थं, न कोऽपि स्तवीतीश्वरं ह्येकमानम्।
मनुष्याक्षिमार्गादतीतः स गुप्तो, विना सद्गुरोः सुप्रसादं न दृश्यः॥

दाम्भिकाः गुरवः त्याज्याः; सद्गुरुः आश्रयितव्यः।

१८० गुरुः कोटिशो लभ्यते मार्गणान्ते, ह्यनेकाश्च मन्त्रा, महांस्तत्प्रभावः।
सकामेषु रे! साभिचारेषु, तेषु, गुरुष्वस्ति नैकोऽपि ते मुक्तिदाता॥

१८१ अभक्तोऽभिचारी परार्थापहारी, मनो! दुर्गुणोन्मत्ततापप्रदश्च।
तथा दाम्भिको निन्दको मत्सरी च, न साधुः, स तु ज्ञानिनामप्यगम्यः॥

१८२ न रे! सद्गुरुः कामनासक्त इष्टः क्रियाहीनवाचालतायां पटुश्च।
सदा वर्तते यस्तु वाचोऽनुसारं, तमेवादरात् सद्गुरुं मार्गयस्व॥

१८३ मनो! ज्ञानवैराग्यभक्त्यन्वितश्च, विवेकी च योगी क्षमावान् कृपालुः।
समर्थश्च चातुर्ययुक्तश्च विद्वान्, समाधानदः सद्गुरुर्मार्गितव्यः॥

निःसंगवृत्त्या देवाधिदेवः भजनीयः

१८४ असन् मायया प्नोत् सतस्तात! भावम्, इति ज्ञानबोधः सदुक्तेरुदेति।
अनिर्वाच्यमप्युच्यतां बोधनार्थं, मनो! ऽनन्त सन्,—मृग्यतां संततं तत्॥

१८५ मनो! भीतिचिन्ताविहीनात्मरूपे, सदाऽऽच्छादयात्मानमत्यादरेण ।
मनो! दृक्पथं नैति रामः सलोके, सदैक्यात् कदाप्यात्मनो नैष भिन्नः ।

१८६ समीपस्थ एवास्ति रामः सदैव, मनो![1] मृग्यतां हे सखे! सत्यमेतत् ।
तवाखण्डयोगस्तु रामेण सार्धं, वियोगप्रसूं तां त्यज द्रागहंताम् ॥

१८७ मनो! ब्रह्मपिण्डाण्डयोरैक्यभावस्, ततो वस्तु तद् भिन्नमेवास्ति नूनम् ।
मनो! भासमानं समस्तं प्रपश्येत्, सुखेनेह तिष्ठेत्तु निःसंगवृत्त्या ॥

१८८ जहि ज्ञानशस्त्रेण रे! देहभावं, विदेहस्थितौ याहि भक्तेः पथैव ।
विरक्त्याश्रयात् सर्वनिन्द्यं जहीहि, मनस्! तिष्ठ निःसंगवृत्त्या सुखेन ॥

१८९ अभिज्ञायतां भूविनिर्मातृदेवो, विलोक्यैव तं मुच्यते मर्त्यजीवः ।
गुणातीतमेनं गुणाढ्यं भजस्व, परं तिष्ठ निःसंगवृत्त्या सुखेन ॥

१९० न कर्ता न भर्तापि सृष्टेः स देवः, परावागतीतः स मायाविहीनः ।
मनो! निर्विकल्पं सदा चिन्तयैनं, परं तिष्ठ निःसंगवृत्त्या सुखेन ॥

१९१ न शक्नोति यो देहबुद्धिं विहातुं, स न ज्ञानबोधक्षमः सर्वथैव ।
परब्रह्म नाऽऽकल्यतेऽहंतया च, कदाप्येति नाज्ञानपुञ्जो विनाशम् ॥

१९२ मनो निश्चलं यस्य रूपं ह्यबोध्यं, स सर्वोत्तमो ध्येय ऐक्यस्य योगात् ।
तदर्थं तु सर्वोपमा नूनमूना, स निःसंगताःसंगतातीत एव ॥

१९३ सुबोध्यो न देवो, ह्यबोध्योऽपि नैव, न शक्यः स्तवो वेदशास्त्रैश्च तस्य ।
अदृश्यो न, दृश्यो न, तद्युग्मसाक्षी, तदन्तो न गम्यो न गम्यः श्रुतीनाम् ॥

१९४ 'वसन्नन्तरे कीदृशो देव?' इत्या-नतः पृष्टवान् साधकोऽत्यादरेण ।
'तनुं प्रोज्झ्य देवो वसत्येष कुत्र? विशत्येष देहान्तरं किं पुनश्च ॥'

१९५ 'हृदिस्थं विजानीहि तं देवमेवम् स्थितो व्याप्य विश्वं नभोवत् स सर्वम् ।
स सर्वत्र, नायाति वा याति नूनं, न रिक्तं स्थलं तं विना किंचिदस्ति ॥

---

१. कर्तृपदम्

१९६ 'असौ संचरत्यन्तरालेऽणुमात्रे, ह्यनुस्यूत आस्ते न किंचिद्विना तम् ।
स्वयं याति तादात्म्यतां द्रष्टुकामो, लयं च त्रयं दर्शन-द्रष्टृ-दृश्यम् ॥

१९७ 'नभःसंनिभं राघवस्यास्य रूपं, सदा ध्यायतो जन्मनिर्मूलनाय ।
न तद्दर्शनाद् देहभावावशेषश्-चिरायोपभुक्त्वापि तन्नैव तृप्तिः ॥

१९८ 'नभोव्याप्य सृष्टिं समस्तां स्थितं तु, यथार्थोपमा नैव तद् राघवार्थम् ।
स्वभावादसौ सर्वमेवाद्वितीयः, कथं व्यापकाख्या तदीयोचिता स्यात् ॥

१९९ 'पुराणा तिविस्तीर्णरूपं विबोद्धुं, न ते तर्कसंपर्कलेशोऽपि शक्तः ।
तदत्यन्तगूढाद्वितीयं; प्रभावात् , परं सद्गुरोर्द्राक् सुबोध्यानुभव्यम् ॥

२०० 'तदाकल्यते ज्ञानबोधात् स्वरूपं तदा सर्वसाक्षित्वमस्तं प्रयाति ।
उदेत्युन्मनस्त्वं च वाचो निरोधः, प्रतीतिश्च यत , सर्वतो राम एव ॥

२०१ 'अभिज्ञात आद्यात्मरूपे द्वितीयं, न संदृश्यते तद्दते चिन्त्यते न ।
चिराद् मीलनं सात्मरूपं च लब्ध्वा, विदेहस्थितेर्देहतापः प्रशान्तः ॥

साध्यं भूत्वा साधनं कुर्यात् ।

२०२ मनो ! यद्यपीदं त्वयाप्तं सुगुह्यं. स्थिरीकर्तुमन्तःप्रयत्नोऽत्यवश्यः ।
सदा तत्त्वमाकर्ण्य ते निश्चयः स्यात्, सतां सङ्ग आश्रीयतां धन्यतायै ॥

२०३ मनो ! भद्र ! सङ्गं समस्तं विजह्यात, सतामाश्रयेताञ्जसात्यादरेण ।
विमुच्येत जन्मोग्रदुःखाद्, यतोऽन्यद्, विना साधनं, प्रेरितः सत्पथे ना ॥

२०४ मनः ! सर्वसंगांश्छिनत्त्येष संगो मनः ! प्रापयत्येष मोक्षं च सद्यः ।
मनः ! साधकं तारयत्येष शीघ्रं, मनो ! द्वैतमेष ह्यशेषं भिनत्ति ॥

फलश्रुतिः

२०५ मनोबोधमाकर्ण्य दोषघ्नमेनं, नरः साधनार्हो भवेद् मन्दबुद्धिः ।
शनैर्ज्ञानवैराग्यसामर्थ्यवांश्च, दृढं चात्र विश्वस्य भुञ्जीत मोक्षम् ॥

मधुशाला*

माधव देशपाण्डे

४५ मस्जिदस्तु शोभितं नैव तत्,
अल्लालापं लपति नमन्,
सालंकृता सखी चायाता,
धीरवरोऽयं पानकरः,
शेख! कथं तुलनैव सम्भवेत्
मस्जिन्मधुगृहयोरुभयोः?
चिरविधवम् तव मस्जिदिदं बत,
चिरसुभगा मे मधुशाला।

४६ मुस्लीमो हिन्दुश्चेतौ द्वौ,
परमेकस्त्वनयोश्चषकः,
एकमेव मदिरागृहमनयोः,
एकानयोस्तथा हाला,
नैकता द्वयोर्यावत् तावत्
मस्जिन्मन्दिरमायातः,
वैरवर्धनं ह्येतद्युगलम्,
संमिलनाय तु मधुशाला।

४७ कश्चिदस्तु वा शेखः प्रणमन्,
पण्डितोऽस्तु मालया जपन्,
कियदपि वैरं ध्रुवं मदिरया
यथेच्छमस्तु पुनर्बिभ्रन्,
सकृच्चेदयं मधुशालायाः
द्वारमुपेत्य पुनर्गच्छेत्,
पश्यामि कथं न पारयेत् तम्
आबद्धुं सा मधुशाला।

---

* पूर्वतोऽनुवृत्तम्।

४८ रसान्तरेष्वास्वादस्तावत्
यावदियं मदिरा दूरम्,
गृह्णात्वन्यन् पात्रं तावत्
यावदसौ चषको दूरम्,
शेखपूजकौ पूजयतां तौ
तावन् मरिजन्मन्दिरयोः,
अवगुण्ठनपटलं व्यपनीय न
विलसति यावन् मधुशाला ।

४९ अद्य तिरस्कुरुतादिदं जगत्,
स्यादूर्ध्वं मदिरा पेया,
अद्य निषेधं गदतु जगदिदम्,
श्वः श्रयणीयः स्याच्चषकः,
जगति जातुचित् कश्चिद् भविता
महम्मदश्चेन् मदमत्तः,
यत्र मन्दिरं यत्र च मरिजत्,
तत्र भविष्यति मधुशाला ।

५० यज्ञवह्निवत् प्रज्वलतीयम्
ज्वाला मदिरायन्त्रस्य,
ऋषिवद् ध्याननिमग्नस्तिष्ठति
सर्व एव मधुपानकरः,
मुनिकन्यावन्मदिराकलशान्
धृत्वा भ्रमन्ति सखिबालाः,
कस्मात् तपोवनान्न्यूना मम
पुण्यपवित्रा मधुशाला ?

५१ सोमसुरां पूर्वे पिबन्ति ते,
सैवास्माकमियं हाला;
द्रोणकलश इत्याख्यातो यः
कलशः स एव नो मधुनः,
वेदादिष्टं त्यजत न कार्यम्,
वेदानां भो रिक्थहराः!
युगे युगे पूजितैव सेयम्
नातिनूतना मधुशाला ।

५२ पुरा वारुणी या समुत्थिता
सागरमथने; सा हाला;
रम्भायाः सन्तानमिदं भोः!
जगति कथ्यते सखिबाला,
सुरासुरैराहृता जगति या
नाशयन्ति किं तां सन्तः ?
कुत्र कियद् बलसामर्थ्यं तत्
वेत्ति हि सम्यङ् मधुशाला ।

५३ ध्वनिः श्रूयते नैव कदाचित्-
'अनेन मे स्पृष्टा मदिरा!',
न वा कदाचिद् ब्रवीति कश्चिद्-
'अनेन मे स्पृष्टश्चषकः!'
जनाः सर्वजातिकाः समेताः
पिबन्त्यत्र मधुरां मदिराम्,
सुधारकशतस्यैकेवेयम्
कार्यं कुरुते मधुशाला ।

५४ श्रमतापं व्यसनं च भवन्तो
विस्मरन्ति पीत्वा मदिराम्,
शिक्षितं बहु स्याद् यदि भवता
सम्यगधिगता मदवत्ता,
व्यर्थमेव हरिजनता प्राप्ता,
श्रेयसे हि सा मधुजनता,
पादाघातो हरेर्मन्दिरे,
मधुरागमना मधुशाला ।

५५ समं स्वागतं सर्वेषामिह
प्रकुर्वते ताः सखिबालाः,
अज्ञविज्ञयोरन्तरं च किम्
भवेदसौ चेन्मदमत्तः ?
सश्रीकाणामश्रीकेभ्यो
मधुशालायां न च भेदः,
साम्यवादविषये प्रचारिका
प्रथमेयं मे मधुशाला ।

५६ पुनः पुनर्भूत्वाग्रतो मया
नाद्य याचिता सा मदिरा,
विद्धि मां न चैतस्मात् कञ्चन
साधारणमधुपानकरम्,
सखि ! दूरं कुरु निखिलं प्रथमम्
मनसः सङ्कोचं स्वीयम्,
स्वरैर्मदीयैरथ निखिलेयम्
गुञ्जिता भवेन्मधुशाला ।

५७ श्वः ? को विश्वसिति 'श्वः स्यामि'ति
कदा सखे ! मधुपानकरः ?
जडौ भवेतां करौ श्वोऽसकृत्
याभ्यामद्य धृतश्चषकः !
अद्य करेऽभूत् ! गतं पुनस्तत् !
श्वः किं भवेत् ? निश्चितिः का ?
श्वः क्वचिन्न मे मधुशाला स्यात्,
कलिकालस्य तु मधुशाला !

५८ प्राप्तेऽद्यावसरे न वारुणीम्
किं गृह्णामि यथाकामम् ?
अद्यायं समयश्चेत् किमहम्
पिबामि चषकं न यथेच्छम् ?
सख्या सार्धं कृतकं कलहम्
किं न करोमि यथाकाङ्क्षम् ?
सकृदेव पुनः संप्रप्या मे
जीवनस्य सा मधुशाला ।

५९ अद्य विधेहि सजीवं, प्रेयसि !
त्वं रुचिराधरयोश्चषकम्,
यौवनमधुरसमदिरासेकैः
पूरय चैनं मधुचषकम्,
कुरुष्व मेऽधरयोराश्लेषम्,
त्वं विस्मर दूरं गमनम्,
अतन्द्रितो मधुपानकरोऽहम्,
प्रीतिरबन्धा मधुशाला ।

६० तव मुखमेव सुमुखि! कान्तमिदम्
कनकमयो मे मधुचषकः,
नृत्यति यस्मिन् मणिकान्तिमयी
रूपमधुरमादकहाला,
स्वयमेव सखा सञ्जातोऽहम्,
जातोऽहमेव पानकरः,
आवां मिलितौ यत्र कुत्रचित्
तत्रैव भवेन्मधुशाला ।

६१ दिनद्वयं मे मदिरां दत्वा
सोद्वेगा सा सखिबाला,
प्रपूर्य चषकं स्थापयति पुरः
सावेगं पुनरनिच्छया,
स्नेहकौशलप्रणामादिभिः
पानं तत् सम्प्रति विरतम्,
सम्प्रति केवलमेषा कुरुते
दानादानं मधुशाला ।

६२ अल्पीयसि जीवने कियन्तम्
प्रणयं, मधुपानं कुर्याम ?
जगति समागच्छन् हि तत्क्षणम्
'निर्गच्छन्नि ति सम्प्रोक्त-,
स्वागतेन सममेव सुसिद्धा
दृष्टा वियोगसामग्री,
आरब्धैव प्रशमं भजते
खलु मम जीवन-मधुशाला ।

६३ चषकः पीतश्चषकादूर्ध्वम्
नाश्रान्तं चेत्, किं पानम् ?
किं जीवनं च सखिबालायाः
निश्चितं न चेत् सहवसनम् ?
हन्त ! भयेन च हानेर्नितराम्
प्राप्तेः सुखं सदानुगतम्,
समासादने मोदं तनुते
सम्प्राप्तापि न मधुशाला ।

६४ पायायितुं मामानयसि त्वम्
स्वल्पतरां मदिराम् इयतीम्,
दर्शयितुं मामानयसि त्वम्
किमेकलं लघुमधुचषकम् ?
इयतीं पीत्वा जीविताद् वरम्
पिपासया जलधेर्मरणम् !
केन विरचिता सिन्धोस्तृष्णा
बिन्दुमितेयं मधुशाला ?

६५ किं ब्रवीषि ? 'तव नावशिष्यते
मदिरायश्चषके लेशः !',
किं ब्रवीषि ? - 'विद्येत न सम्प्रति
मधुनश्चषकाणां माला !'
स्वल्पं पीत्वा बहु चेत् तृष्णा,
शिष्टं न च किञ्चित् पातुम्,
तृषाशान्तये निमन्त्रयन्ती
तृषावर्धिनी मधुशाला ।

६६ ललाटलिखिता यावन्मात्रा
तावत्येव सुरा लभ्या,
ललाटलिखितो यादृग्रूपः
तादृशो हि चषको लभ्यः,
अतः किञ्चिदन्यच्च घटयितुम्
कामं कुरु नितरां यत्नम्,
ललाटफलके या तव लिखिता
सैव लप्स्यते मधुशाला ।

६७ कुरु, कुरु कार्पण्यं त्वं नितराम्
दातुं मे मधुरां मदिराम्,
देहि, देहि मह्यं पुनरेकम्,
भग्नविभग्नं मधुचषकम्,
सहे परमिदं कृत्स्नमहं, सखि!
यास्यसि पश्चात् त्वं खेदम्,
भविष्यामि नाहं यदा, तदा
मां स्मरेदियं मधुशाला ।

६८ अवधानं मानापमानयोः
त्यक्तं यदा सुरा पीता,
गौरवमखिलं विस्मृतं, यदा
करे मृन्मयो मधुचषकः,
धनकाङ्क्षा चोदितया सख्याः
दुर्वाचा निकृतिर्न मता,
प्राप्य परिभवं जगति च निखिलम्
प्राप्ता मया हि मधुशाला ।

६९ क्षीणदुर्बलः क्षुद्रभङ्गरः
नरो मृन्मयो मधुचषकः,
यस्यान्तःपूरिता स्थितेयम्
कटु-मधु-जीवनरस-मदिरा,
शतशतहस्तान् विकीर्य परितः
निष्करुणो मृत्युर्हि सखा,
प्रबलः कालो मधुपानकरः
संसृतिरेषा मधुशाला ।

७० चषकनिभान् नः कश्चिन्मत्वा
जीवनमधुना पूरितवान्,
ज्ञातो मदो न, पीतोऽस्माभिः
भूयो भूयो मधुचषकः,
जीवनव्यथा या समुदयते
चषकैः सा च लघूक्रियते,
सार्धमाद्यया सख्या जगतः
स्पर्धते हि सा मधुशाला ।

७१ अस्मद्-द्राक्षाफलैर्वपुषि नः
मदिराऽस्माभिः प्रपूरिता,
शेख! कथयसे किं त्वम्-'नरके
नस्तापयेत् भृशं ज्वाला!'?
तदा तु भूयो मधु कलितं स्यात्,
सुरां कश्चिदपरोऽपि पिबेत्!
वयं तु नरकज्वालायामपि
सम्पश्यामो मधुशालाम् ।

मदीयश्चषकः—

७२ बच्चन! कविवर! तव मदिरेयम्,
चषकस्त्वेष मयाऽऽनीतः,
पायं पायं मधु मदमत्तः
सञ्जातोऽहमिहायातः,
आकण्ठं परिपीता हाला,
न च रिक्तश्चषको जातः,
परीवाहरूपिणी राजताम्
ममापि काचिन्मधुशाला।

निकषोपलः

जैमिनिसाम (तलवकारशाखिनां) सन्ध्यावन्दनप्रयोगः

प्रकाशकः-टि. राजगोपाल अय्यङ्गार्, के. एस्. टि. वि. पाठशाला श्रीरङ्गम्, निरुचि-६. । १९७०. रू. २-००.

सामवेदे जैमिनीया (तलवकाराभिधा) शाखा अत्यन्तविरलप्रचारा अद्यत्वे केरले क्वचित्, द्रमिडदेशे च क्वचिदुपलभ्यते । श्रीरङ्गक्षेत्रेऽस्याः शाखाया रक्षाप्रचारणार्थं श्रीकाञ्ची-कामकोटि-पीठाधीश्वराणामनुग्रहेण केन्द्रीय-संस्कृतपरिषदुपकारेण च पाठशाला काचित्प्रतिष्ठिता, यत्रेमे राजगोपाल-अय्यङ्गार-महाशया अध्यापनं कुर्वन्ति । अस्मिन् लघुनि पुस्तके जैमिनीयानां सन्ध्यावन्दन - यज्ञोपवीतधारण - परिषेचन - ब्रह्मयज्ञ - दर्शतर्पणविधयः समन्त्राः द्रमिडानुवादेन सह श्री राजगोपाल-अय्यङ्गार-महाशयैः दत्ताः ॥ (वे. रा.)

भारद्वाजसूत्रश्राद्धप्रयोगः

पक्षितीर्थीयैःश्रीसुब्रह्मण्यदीक्षितैः संकलितः । एस्. रङ्गनाथ अय्यर् ४, कुप्पय्य चेट्टि स्ट्रीट्, पश्चिम-माम्बलम्, मद्रास्-३३ । १९७०. विना मूल्यं दीयते ।

यजुर्वेदीयेषु सूत्रेषु भारद्वाजीयं विरलं, तदनुष्ठातारः, प्रयोगज्ञाः पुरोहिताश्चापि विरलाः । तैत्तिरीयाणां षट्सु सूत्रेषु अन्यतममिदं भारद्वाजीयम् । श्रीरङ्गनाथार्याः अस्य ग्रन्थस्य प्रकाशकाः भारद्वाजीयाः, तद्धस्ते चिरात्परं-परागतायां ग्रन्थलिपिमातृकायां यो भारद्वाजीयश्राद्धप्रयोग आसीत्, तामादाय अन्यैर्भारद्वाजीयग्रन्थैः संवाद्य परिशील्य पक्षितीर्थं श्रीसुब्रह्मण्यदीक्षितानां साह्येन प्रकाशितोऽयं ग्रन्थः । तत्र तत्र द्रविडभाषया विवरणमपि दत्तम् । धन्यवादार्हाः रङ्गनाथार्याः, सुब्रह्मण्यदीक्षिताश्च ॥ (वे. रा.)

कठोपनिषत् साङ्ग्लानुवादा

पि. कृष्णमूर्तिः, ५६७७, सैण्ट् मेरिस् रोड्, सिकन्दराबद् (आ. प्र.) । रू. १.

सुप्रसिद्धाया अस्या उपनिषदोऽनेके आङ्ग्लानुवादाः प्रकाशिताः । तथापि अतिस्वल्पमूल्येन जनतासु प्रचारार्थं तत्तद्-भक्तिवेदान्तस्तोत्रादि-ग्रन्थान् तेलुगु-आङ्ग्लानुवादैः निरन्तरं प्रकाशयतः श्रीकृष्णमूर्तेरुत्साहः श्लाघनीयः । अनेनैव ३८ लघुग्रन्थाः प्रकाशिताः ॥ (वे. रा.)

श्रीगणेशाथर्वशीर्षोपनिषत् (सुधाख्य-व्याख्यायुता)

व्याख्याता-कै. म. म. श्रीधरशास्त्रिवारे । कार्यवाहः, भारतवाणी-प्रकाशनमाला, १४४२-४३, सदाशिव, पुण्यपत्तनम्-३०. १९६९ । रू. ३-५०.

म. म. श्रीधरशास्त्रिविरचितसुधाख्यव्याख्यासंवलितः 'श्रीगणेशाथर्व-शीर्षोपनिषत्' नामको लघुग्रन्थः पण्डितबहुमान्यो वर्तते । विशदाऽविस्तरा शास्त्रवैदुष्यमयी च व्याख्या ग्रन्थस्योपयोगितां प्रगुणयति ॥ (कु. वे. शे.)

वेदकालीन-जनतन्त्रस्थानानि

ग्रन्थकर्ता-अग्निहोत्रं रामानुजताताचार्यः । केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपति । १९७०.

केन्द्रीयसंस्कृतपरिषदा पण्डितेषु आधुनिकदृष्ट्या विमर्शनं वर्धयितुं शोधच्छात्रवृत्तिर्दीयते । तत्र प्रथमगोष्ठ्यामेव एतादृशे शोधकार्ये प्रवर्तितेषु पण्डितेषु ग्रन्थाकारोप्येकः। अनेन मद्रपुर्यां श्रीकुप्पुस्वामिशास्त्रिसमीक्षासमितिद्वारा डा० वे. राघवार्याणां निर्देशानुसारेण यच्छोधकार्यं निर्वर्तितं, तस्य फलभूतमिदं प्रकाशनम् ।

अत्र वेदेषु चिरं तं तं विचारं नानाविषयगतं कृतवता कुलक्रमागत-वेदश्रौतवैदुष्यसंपन्नेन पाश्चात्यसंस्कृतज्ञैः कृतान् वेदविमर्शानपि पठितवता ग्रन्थकृता भारतदेशस्य अद्यत्वपरिस्थितिं शासनपद्धतिं चानुचिन्त्य जनतन्त्रं राज्यं तदापि प्राचीने वेदकालेऽपि बभूवेति बहुप्रमाणपुरस्सरं निरूपितवान् । समिति - सभा - विदथानामर्थः, राज्याङ्गानि, राज्याधिकारिण इत्यादयो विषयाः सविमर्शं प्रतिपादिताः ॥ (कु. वे. शे.)

जीवन ज्योतिः अथवा वैदिक - गीताञ्जलिः

विद्यामार्तण्डो डा० मङ्गलदेवशास्त्री । मोतीलाल् . बनारसीदास्, चौक् वाराणसी १९६८ । रू. ६-००.

एतद्ग्रन्थप्रणेता डा० श्री मङ्गलदेवशास्त्री सुविदितः संस्कृतप्राचार्यः, विशिष्य वैदिके विज्ञः, वारणसेयसंस्कृतकलाशाया अध्यक्षः, विश्वविद्यालय-रूपेण तत्कलाशालाया निर्माणे कदाचिदधिकृतश्चासीत् । विदिताश्च स्वतन्त्रतया

तेन रचिता केचन अध्यात्मवासनावासिताः संस्कृतकाव्यबन्धाः। अत्र विमृश्यमाने ग्रन्थे सः स्वकीयदर्शनं नः समर्पयति ।

प्रबन्धोऽयं श्लोकबद्धः नरनारायणयोः दुःखावेशदुरवस्थं लोकमनुजिघृक्षतोः संवादरूपः । आपीठरचनं प्रतिपादननिर्वाहः कर्तुः कवेः कल्पनाशक्तिं मनोभावोदात्ततां च प्रदर्शयति । जगन्न दुःखमयं नापि नैराश्ममयं नापि कस्यापि तत्त्वस्य केवलं छायामयं, किन्तु आशा-प्रसाद-आनन्दमयम्; अन्तर्यामिणो जगत्पतेः प्रसादाय, तद्द्वारा इहैव जीवन्मुक्ति-अनुभवाय च यथा व्रत-चारित्र्य-नीति-भावसंशुद्ध्यादिसाधनैर्यतितव्यं, तथा षोडशरश्मिभिः प्रतिपादयति कविः । प्रतिप्रघट्टकं सूत्ररूपेण शीर्षकं, तदुपोद्बलकं वेदवाक्यं च दत्तम् । भावगर्भया शैल्या निरूपिता विषयाः चिन्ताप्रेरकाश्च । सर्वथा सुश्लाघ्योऽयं ग्रन्थः ॥ (वे. रा.)

गीतार्थसग्रहः, गीतार्थसङ्ग्रहरक्षा च

अनुवादकः-श्री वीरराघवाचार्यः । प्राप्तिस्थानम् - श्रीवेदान्तदेशिक - सप्तमशताब्दिमहोत्सवसमितिः, त्रिशिरःपुरी, श्रीरङ्गम् १९६८. । रू. १.

अत्र विशिष्टाद्वैताधारभूतं यामुनाचार्यस्य गीतार्थसङ्ग्रहः, वेदान्तदेशिकस्य गीतार्थसङ्ग्रहरक्षा इति ग्रन्थद्वयं द्रमिडभाषया प्रसिद्धैः मधुरान्तक-श्रीवीरराघवाचार्यस्वामिभिरनूद्य दत्तं पठितृणां भक्तानां च बहु उपकरिष्यति ॥ (वे. रा.)

शाक्तदर्शनम्

पं. श्रीचक्रेश्वर भट्टाचार्यः। चौखम्बा संस्कृत सीरिस्, पो० बा० ८., गोपालमन्दिरम् वीथी, वाराणसी-१ । १९७०.

पं. श्री चक्रेश्वरभट्टाचार्येण वेद-वेदान्त-पुराण-न्याय-तन्त्रादिभ्यः सारमाकृष्य शाक्तशास्त्रानुरागिणां विदुषामुपासकानां च हितार्थं संकलितमिदं शाक्तदर्शनम् । ग्रन्थकर्ता न केवलं पण्डितः, किन्तु गौहाती-नगरे उग्रतारापीठे प्रधानाराधकः; अस्माभिस्तत्रैव साक्षादस्य दर्शनमप्यभूत् । इतः पूर्वमसामीयभाषायां 'शक्तितत्त्वम्' नाम ग्रन्थः, संस्कृते 'तारार्चनतन्त्रम्' 'शतचण्डीप्रयोगतन्त्रम्' इति ग्रन्थद्वयं च विरचितम् ।

शक्तिस्वरूपम्, वेदेतिहासपुराणेषु शक्तितत्त्वम्, तद्भेदानां महालक्ष्मी-महासरस्वती-महाकालीनां विवरणम्, शिव-माया-राग-कलादितत्त्वम्, सृष्टिः, शक्तिमार्गप्रवर्तका आचार्याः, उपासनाविधिः, वामदक्षिणाद्याचारभेदाः, पञ्चमकारविवेचनम्, चण्डीपाठहोमादि, देवीरूपभेदाः, देवीपीठानि,—इत्यादिका बहवो विषया अत्र ज्ञानानुभवप्रमाणपुरस्सरं व्याख्याताः। अस्य ग्रन्थस्य प्रकाशककृते केन्द्रीयसंस्कृतपरिषदा यद् धनं दत्तं तत्सफलम्॥
(वे. रा.)

न्यायमञ्जरी (प्रथमसम्पुटः) न्यायसौरभनामकटिप्पणीयुक्ता

टिप्पण्याः सम्पादनस्य च कर्ता-श्री. को. सु. वरदाचार्यः। ओरियण्टल् रिसर्च् इनस्टिट्यूट्, मैसूर्। मूल्यम् ४२ रूप्यकाणि।

आदितश्चतुर्थाह्निकपर्यन्तं न्यायमञ्जर्या आवश्यकस्थलेषु टिप्पणालंकरण-पूर्वकं भावाविष्करणमत्र न्यायसौरभाख्ये ग्रन्थे कृतम्। यथा शब्दशास्त्रे महाभाष्यानन्तरं वाक्यपदीयम्, तथैव प्रमाणशास्त्रे न्यायभाष्याद्यनन्तरं न्यायमञ्जर्येकैव प्रमाणप्रमेयस्थेयभूतेत्येतत् नाविदितं विदुषाम। गङ्गेशोपाध्याय-प्रभृतिभिः जरन्नैयायिकत्वेन प्रस्तुतः प्रकृतग्रन्थकर्ता जयन्तभट्टः कुत्रापि कोणे निस्साधन एव सन् मुखस्थानि समस्तान्यपि शास्त्राणि कृत्वा स्वग्रन्थे यथावसरं तत्तद्ग्रन्थस्थानि वाक्यानि उदाजहारेति अहो प्रतिभाऽस्येति विद्वांस विदामासुः। प्रकृतग्रन्थे धर्मकीर्तिः, भट्टपादाः इत्युभावेवास्य प्रतिद्वन्द्विनौ। न्यायशास्त्रं बौद्धमतानुगं चकारेति धर्मकीर्तिप्रद्वेषः, अतोऽत्र तदीयप्रमाणवार्ति-कादयो ग्रन्थाः तावद् विमृष्टाः यावता प्रचारोऽपि तेषां लुप्तप्राय आसीत्। कविर्वश्यवाग् याज्ञिकश्चायं जयन्तभट्टः। इतः पूर्वमस्य ग्रन्थस्य मन्ये न केनापि व्याख्या कृताऽथवोपलब्धेति। साम्प्रतम् यावदावश्यकं युक्तस्थलेषु मूलाशय-विवरणार्थं श्रीमद्भिः कोत्तिमङ्गलम् सु. वरदाचार्यैः व्याख्या आरचिता। अत्र व्याख्यातुर्मीमांसानिष्णातत्वं न्यायसागरनिमग्नत्वं च पदे पदे स्फुटमेव। मूलकारो न केवलं मीमांसकान् शालिकनाथप्रमुखान्, न वा बौद्धजैनादीन् बाह्यान्, परंतु आलङ्कारिकानपि साग्रहमधिक्षिपति। 'भम धम्मिअ वीसत्थो'—इति गाथासप्तशतीश्लोके विधितो निषेधध्वनिः इति आनन्द-वर्धनाचार्या आहुः। तानपि विश्वविख्यातान् पण्डितम्मन्यत्वेनाधिक्षिपति

जयन्तभट्टः (पु. १२९) । एवं प्रत्यक्षलक्षणसूत्रे भोजराजप्रोक्तं प्रत्यक्षशब्द-विवरणमपि निराकरोति । केवलं वाचस्पतिमिश्रपक्षमेकमेव सर्वत्र स्वोपजीव्य-त्वेनाङ्गीकरोति । न्यायभूषणकारोऽप्यनेन अपवर्गप्रकरणे खण्डित इति अस्मन्न्यायाचार्या अभ्यधुः । एतादृशं सर्वमतसङ्ग्राहकं ग्रन्थं व्याख्या-तुमपेक्षिता सार्वत्रिकी सर्वंसहनिशितधीः व्याख्यातुरस्तीत्येतद् व्याख्याद्वारा विज्ञाय नितान्तं हृष्यामः । यथा—'चत्वारि शृङ्गाः' इति श्रुतिः शब्दशास्त्र-परतया भगवत्पतञ्जलिमहर्षिणा व्याख्याता । जयन्तस्तु श्रुतिपरतयैव व्याचख्यौ । अत्र व्याख्याता प्रमाणं निर्दिशति—'गोपथब्राह्मणोक्तविवरणमनुसृत्य शबरेण (शा. भा. १-२-३८) विवृतोऽर्थोऽनूदितः' इति । यथा 'मन्त्रो हीनः स्वरतो वर्णतो वा'—इति श्रुतिः 'दुष्टः शब्दः स्वरतो वर्णतो वा' इति पस्पशायां महाभाष्यकारैः बुद्धिपूर्वकं व्यत्यासेन पठिता इति कुमारिलभट्टा उपालभन्ते, तद्वत् प्रकृतेऽपि स्यादिति ज्ञायते । मूलकारेण मध्ये बहवः श्लोकाः पठिताः । तत्र मूलकारीयश्लोकाः के इति बहुग्रन्थसाहाय्येनैव निर्धारणीयं वर्तते । 'विशे-षेऽनुगमाभावात्'— इति अनुमानप्रतिक्षेपकः श्लोकः चार्वाकाणामिति परमत-भङ्गे (लोकायतभङ्गाधिकारे) आचार्यैरभिहितम् । एवं सुबहु सर्वार्थसिद्ध्यादि-साहाय्येन विचार्यं वर्तते । 'कृतं कान्तस्य तन्वङ्ग्या त्रिरपाङ्गविलोकनम् । चतुरालिङ्गनं गाढं अष्टकृत्वश्च चुम्बनम् ॥' इत्युपात्तस्य (पु. ५५) श्लोकस्यायमर्थः—"·····आलिङ्गनचतुष्टयम् । "स्पृष्टकम्, विद्धकम् उद्घृष्टकम्, पीडितकम् इति" (कामसूत्रम २-२-६) इति वचनात् चतुविधमालिङ्गनमपि तन्वङ्ग्या कृतमिति । एवम्—'ललाटालककपोलनयन-वक्षः (लक्ष. पा.) स्तनौष्ठान्तर्मुखेषु चुम्बनम्' (कामसूत्रम् २-३-४) इति वचनात् अष्टसु स्थलेषु यत् चुम्बनं विकल्पितम्, तत् तन्वङ्ग्या कृतम्-इति । एवं त्रिः, इत्यत्रापि स्मेर-कटाक्ष-तरङ्गितभेदेन भावप्रकाशादिषु प्रसिद्धस्य अवलोकन-त्रैविध्यस्य ग्रहणं बोध्यम् । ततश्च मूले "तद्भेदेऽपि" इत्यस्य अपाङ्गालिङ्गन-चुम्बनभेदेऽपीत्यर्थः । तत्र तत्र सम्पादकैर्यथावसरं मूलोद्धृतानां प्रमाणाना-माकरः सङ्केतित इत्येतत् विमर्शकानां मोदावहम् । सर्वथाऽतीव प्रशंसनीया कृतिः । पूर्वं द्विवारं (विजयनगरसंस्कृतग्रन्थावली, चौखम्बा संस्कृतग्रन्थावली) मुद्रितोऽपि साम्प्रतिकमुद्रणं श्लिष्टं समीचीनं बहूपयोगि च । व्याख्यातुर्व्या-ख्याकौशलपरिज्ञानाय द्वितीयाह्निकमेकमलम्, तत्रापि प्रत्यक्षलक्षणसूत्रमेक-मेवालम् । शीघ्रमेवोपरितनभागस्यापि अनयैव विधया परिष्कृत्य मुद्रणं

प्रतीक्षमाणा वयमास्महे। पण्डितकुलम्, विशिष्य नैयायिकनिकायोऽतीवाधमर्णो वरदाचार्येभ्यः । प्रमादापतिताः (पु. १४८ श्लोकवार्तिकोऽयम् इत्याद्याः) मुद्रणापतिताश्चानिवार्या अशुद्धयः द्वितीयसम्पुटे वाऽवश्यं परिहार्याः ।

(वा. श्रीवत्साङ्काचार्यः)

शाब्दतरङ्गिणी

पण्डितराज वे. सुब्रह्मण्यशास्त्रिणा लिखिता । संस्कृत-विद्या-समितिः, १४-प्राच्य-माडवीथी, मैलापूर, मद्रास्-४ । १९६९. रू. १०.

श्रीमद्भिः मान्यवरैः वे. सुब्रह्मण्यशास्त्रिभिः अस्मत्पूर्वजग्रामनिवासिभिः निर्मिता 'शाब्दतरङ्गिणी' आन्तं मया दृष्टा आलोचिता च । तत्र श्रीशास्त्रिवर्यैः यादृशं मेधावित्वं कौशलं च प्रदर्शितं, तन्नैयायिकानां प्रमोदावहमस्ति ।

तद्यथा—शब्दखण्डप्रणालीप्रकाशकाः कतिपये पदवाक्यरत्नाकर-विभक्त्यर्थ-निर्णयादिग्रन्था एव अद्य यावत् परिचिता आसन् । अनेन ग्रन्थेन तु व्युत्पत्तिवादे व्युत्पत्तिं जिज्ञासमानानां कृते अपरेऽपि रामरुद्रीयप्रभृतयो ग्रन्थाः शाब्दबोधप्रक्रियाबोधने समर्थाः सन्तीति ज्ञायते ।

वाक्यजन्यबोधस्य प्रथमान्तार्थमुख्यविशेष्यकत्वं नैयायिकैरनुभूतं वेदान्तिनामप्यनुभवारूढमस्तीति श्रीमधुसूदनसरस्वतीभिः 'अयमात्मा ब्रह्म' इति श्रुति-वाक्यं प्रमाणीकृत्य साधितम् । तदेव प्राचीनपरम्परासिद्धं मतं श्रीशास्त्रिवर्यैः संसाध्य एतद्ग्रन्थद्वारा आत्मनः समस्तमतनिष्णातत्वं स्थापितमस्ति ।

एतावत्पर्यन्तं नैयायिकैरनुभूतं पूर्वाचार्यैरङ्गीकृतमपि प्रथमान्तार्थमुख्य-विशेष्यकत्वं वैयाकरणमीमांसकाभ्यामनादृतत्वात् अतदर्हं केवलं जल्पवितण्ड एव समाश्रयते इत्याक्षेपप्रसिद्धेः नैयायिकानां शिरोऽवनतमासीत् । परमिदं-प्रथमतया वेदान्तिनां गोष्ठीषु तदभिमतव्यवहारसिद्धं प्रथमान्तार्थमुख्यविशेष्य-कत्वमस्तीति शास्त्रिवर्यैः प्रकाशनेन, नैयायिकानां यशः समुज्ज्वलितमस्ति ।

तदुक्तम्-'बोधादिष्वभिनिवेशरहिताः वेदान्तिनोऽपि शाब्दबोधवर्णनप्रसङ्गे प्रथमान्तार्थमुख्यविशेष्यकं बोधं वर्णयन्ति।' (पृ. १८३) 'तथा च प्रथमान्तार्थ-विशेष्यकः आख्यातार्थकृतिप्रकारको बोधः नाव्युत्पन्नः इति सिद्धम् । तस्मा-दसति बाधके प्रायः प्रथमान्तार्थमुख्यविशेष्यक एव बोधः समुचित इति ।

(पृ० १९६) तदेतेषां वचनकुसुमाञ्जलिं स्वीकृत्य सरस्वती अनुमोदतामयं ग्रन्थमिति भगवन्तं प्रार्थये ॥ (द्राविड राजेश्वरशास्त्रिणः)

भाषायोगवासिष्ठसार (ज्ञानसार)

कवीन्द्राचार्यसरस्वतीकृत । डा० व. ग. राहूरकरेण संपादितम् । भारतवाणी प्रकाशनमाला, १४४२-४३, सदाशिव, पूना-२ १९६९ । रू. ६.

कवीन्द्राचार्यसरस्वतीनां चरितं, कृतीश्चाधिकृत्य वितत्य नैकवारं च गोडे-राघवमहाशयाभ्यं लिखितः । योगवासिष्ठस्य महतः प्रबन्धस्य यः सारो महीधरेण दशभिरध्यायैः कृतः, तस्य प्रसिद्धेन मुहम्मद् दाराशिकाहाद्युपदेष्ट्रा कवीन्द्राचार्येण 'हिन्दी'-भाषया अनुवादः कृतः । एतस्यानुवादस्य यद्यपि नैका मातृकाः सन्ति तथापि एकामेव मातृकामालम्ब्य प्रकाशितोऽयं श्रीराहूकरेण । हिन्दी-आङ्ग्ल-भाषाभ्यामुपोद्घाते कवीन्द्राचार्यस्य चरित्रादिकं, तत्कृतयः, तत्सम्बद्धा विषयाश्च विवेचितानि । अन्ते आङ्ग्लानुवादोऽपि योजितः सम्पादकेन ॥ (वे. रा)

श्रीवल्लभाचार्याः-तेषां वेदान्तमार्गः, मतं च

आङ्ग्लभाषानिबद्धस्यास्य ग्रन्थस्य कर्ता श्री जे. जि. षा महोदयाः । पुष्टिमार्गीयपुस्तकालयः, नडियाड् (गुजरात्) १९६९ । रू. ३५.

श्रीशङ्कररामानुजमध्वाचार्याणामनन्तरं समुद्भूतेषु अर्वाचीनेषु वेदान्त-प्रतिष्ठापकाचार्येषु श्रीमद्वल्लभाचार्याः (१५-शताब्दी) अत्यन्तं प्रसिद्धाः । श्रीमद्वल्लभप्रतिपादितस्यानुसृतस्य च भक्तिमार्गस्य पुष्टिमार्ग इत्यपरं नाम । तेषां मते भक्तिः साध्यमेव न तु साधनम् । परमात्मनः कृपैव मुक्तेः प्रधानं साधनमिति च तेषामाशयः । शुद्धाद्वैतमिति प्रसिद्धं तेषां मतमिदमुत्तरदेशे प्रचारमाप इति सर्वविदितम् ।

सामान्यपठितृणामपि एतद्विषयावगमः सुगमो यथा भवति तथा सरलया सुबोधया शैल्या ग्रन्थममुं विरचय्य महान्तमुपकारं कृतवन्तः श्रीमन्तः षा-महोदयाः । अत्र स्थितेषु एकादशसु अध्यायेषु वल्लभाचार्यचरित्रम्, तेषां प्रसिद्धिः, वैदुष्यं, मतप्रतिष्ठापकत्वं, आचार्यान्तरतोलनात्मकपरिशीलनम् इत्यादयो बहवो विषयाः सकौशलं प्रतिपादिताः । एतद्विषयोपकारका बहवोऽनु-

बन्धाश्च ग्रन्थेऽस्मिन् निबद्धा इति स्पष्टमेव एतस्याः कृतेः प्राशस्त्यम् । श्रीमद्वल्लभसिद्धान्तप्रतिपादकः समग्रः प्रामाणिकश्चायं ग्रन्थः । इदंप्रथमतया ग्रन्थमिमं सर्वजिज्ञासूनामुपकारकत्वेन प्रकटीकृत्य विरचितबहुग्रन्थाः श्रीमन्तः षा-महोदयाः सर्वाभिनन्द्यास्संजाताः ॥ (डा० मु. न.)

श्रीस्तुतिः, अभीतिस्तवश्च

श्रीमद्वेदान्तदेशिकैः कृतं स्तोत्रद्वयम् मधुरान्तकम् श्री वीरराघवस्वामिभिः द्रविडभाषया अनूदितम् । रा. कृष्णस्वामि चेट्टि, श्रीचिदम्बरविलास् मोटार् सर्विस्, तिरुचि । १९६८.

श्री वैष्णवैरन्यैर्भक्तैश्चासकृदावर्त्यमनेषु श्रीमद्वेदान्तदेशिकस्तोत्रेषु मुख्यमिदमुभयमपि लक्ष्मीविषयिका स्तुतिः, अभीतिस्तवश्च । अद्भुतफलप्रदतया च प्रसिद्धा श्रीस्तुतिः । अत्र मुद्रितेन द्राविडानुवादेन सह, भूमिकायां श्रीमद्वेदान्तदेशिकानां दिव्यचरितं, तत्कृतं कृतिजातं च द्रमिडभाषया अनुवादकर्तृभिः परिशीलिते । आस्तिकोपयोगीदं प्रकाशनम् ॥ (वे. रा.)

श्रीस्तुतिः

संस्कृतमूलं श्रीमतो वेदान्तदेशिकस्य । आङ्ग्लानुवादकः श्रीमान् पि. कृष्णमूर्तिः । चारी अण्ड् कम्पेनी, सिकन्दराबाद्, १९६९ । रू. ०-५०.

श्रीवैष्णवमतप्रतिष्ठापनधुरन्धराः श्रीमन्तो निगमान्तदेशिकाः सुप्रसिद्धाः । तैः संस्कृतभाषायां विरचिता पञ्चविंशतिश्लोकात्मिका श्रीस्तुतिः । तस्याः कृतेः आङ्ग्लानुवादः प्रकृतोऽयं ग्रन्थः ।

अनुवादः सरलः हृदयंगमश्च । यथाशक्ति मूलस्य सौन्दर्यं समासादितवन्तः श्रीमन्तः कृष्णमूर्तिमहोदयाः अभिनन्दनीयाः । मूलग्रन्थः, अनुवादश्च उभयमप्यत्र दृश्यते । किन्तु मूलग्रन्थः आन्ध्रलिप्यां मुद्रित इति हेतोः आन्ध्रेतराणां दुरवबोधोऽयं ग्रन्थः । संस्कृतग्रन्थनिबद्धारः सर्वेऽपि आन्ध्रविद्वांसः सर्वजनोपकारं लक्ष्यीकृत्य नागरलिपिं उपयुञ्जीरन्निति आशास्महे । (डा. मु. न.)

श्रीवेङ्कटेश्वरविशेषवैभवस्तोत्रम्

मुल्लण्ड्रं एस्. वि. रामनाथघनपाठिना प्रणीतम्। २६ ति. ति. देवस्थानं कर्टर्स्, तिरुपति।

अत्र तिरुपतिक्षेत्रे विराजमानस्य लक्षसंख्यया भक्तान् धनोपहारांश्च तेभ्य आकर्षतः कलियुगवरदस्य वेङ्कटेशितुः स्तोत्रद्वयं घनपाठिना प्रणीय दत्तम्। प्रथमस्तोत्रे भगवतो रूपालङ्कारवर्णनम्, तन्मूर्त्तेर्याथात्म्यं प्रति ऐतिह्यसिद्धा उल्लेखाः प्रचरन्ति, तेषां निर्देशश्च दृश्येते। द्वितीयस्तोत्रे अष्टके कार्त्तिकेयरूपित्वेन तस्यैव वर्णनं प्रार्थना च क्रियेते॥ (वे. रा.)

श्रीयादवगिरि लक्ष्मीनृसिंहप्रपत्तिः

रचयिता-एन्. सी. एस्. वेङ्कटाचार्यः। १-८-१५८, चिक्कडपल्ली। रू. ०-५०.

उपविंशतिपद्यैः प्रपत्तिरियं कविना शतावधानिना आ० प्र० स्थ-यादवगिरि-क्षेत्रविराजमाननृसिंहचरणयोः समर्पिता। प्रतिपद्यं भक्तिस्वातन्त्र्येण भगवद्विषये उत्प्रेक्षया तांस्तान् कुर्वदिदं स्तोत्रं रचयितुः कल्पनाप्रौढिं प्रदर्शयति॥ (वे. रा.)

श्रीराधाकृष्णप्रभा

ग. जो. सोमयाजी। भारतीयविद्याभवनम्, नवदेहली। १९७० रू. ४.

भारतीयाध्यात्मतत्त्वव्याख्यानैः पाश्चात्यलोके भारतीयं महिमानमुद्घोषितवतां दर्शनप्राचार्याणां स्वतन्त्रभारतस्य विश्रान्तराष्ट्रपतीनां श्री सर्वेपल्लि राधाकृष्णमहानुभावानां जीवितचरित्रं, मेधाविलासः, तैः सधितानि तानि तानि राष्ट्रीयाणि, विश्वजनीनानि, विद्योन्नतिविषयकानि कार्याणि, तदीया उदारा मनोभावाः इति सर्वमेतत् प्रसन्नललितैः पद्यैर्वर्णितमस्मिन् खण्डकाव्ये ग्रन्थकर्त्रा सोमयाजिना। पुस्तकस्यास्य वर्तमानराष्ट्रपतीनां श्री व. वे. गिरि-महाशयानामामुखं गौरवमावहति॥ (वे. रा.)

चाणक्यनीतिशाखासंप्रदायः

१,२,३ भागाः। लूडिक्-स्टेरन्बाग्-नाम्ना पाश्चात्यविदुषा संपादिताः। विश्वेश्वरानन्द संस्थानम्, पो. साधु आश्रमम्, होशियारपुरम् पञ्जाब्। प्रतिभागं मूल्यं रू. ३५.

सुभाषितेषु तथा चाणक्यराजनीतिग्रन्थेषु च अतिविपुलं सुसूक्ष्मं च निस्संख्यमातृकापरिशोधनेन महान्तं परिश्रमं कृतवन्तमेनं स्टेर्णबाक्-नामानं संस्कृतप्रपञ्चे सर्वे सम्यग् जानन्त्येव। भागत्रयात्मके अस्मिन् चाणक्यनीति-ग्रन्थसंप्रदायपर्यालोचनप्रबन्धे विदुषानेन प्रदर्शितम्—एषां चा. नी. ग्रन्थानां मौलाः षट् पाठक्रमा दृश्यन्ते; २२५ मातृकाभ्यः २२३५ एतच्चा. नी. ग्रन्थीयत्वेन प्रतीताः श्लोकाः प्रचारे दृश्यन्ते। प्रथमो भागः पाठक्रमान्, तेषां मिथस्संबन्धान् विशेषांश्च, उपोद्घातनिबन्धेन पट्टिकाभिश्च निरूपयति। अत्र विचारितेषु पाठक्रमेषु भारतदेशाद् बहिः तिबेत्, बर्मा, सिलोन्, जावा इत्यादिदेशेषु प्रचरन्तः पाठाश्चान्तर्भूताः। अराबिक्, सिरियक्, तमिलभाषायां नालडियार्-नीतौ च विचारो विस्तारित इत्यहो ग्रन्थकर्तुः परिश्रमः! द्वितीयतृतीयभागयोः विविधपाठक्रमगताः चा. नी. श्लोका अकारादिक्रमेण आकरपाठभेदनिर्देशपुरस्सरं प्रदत्ताः। अन्ततो गत्वा यस्सर्वमूलभूतः पाठः स्यादित्यपि ऊहापोहनयोन्नीय प्रदर्शितम्। लघुरपि चा. नी. ग्रन्थोऽत्र बहुप्रचारः बहुदूरं विदेशेष्वपि प्रसृतः यादृशं महत्त्वं गतः, तदत्र स्टेर्ण्बाक्-प्रयासेन स्पष्टीकरोति। सर्वं कार्यं सुकृतं शोभनं भवति, महते गौरवाय च भवतीत्येतस्योदाहरणभूतोऽयं स्टेर्ण्बाक्-विदुषः परिश्रमः॥

(वे. रा.)

भारतेतिहासः

पं. इन्द्रो विद्यावाचस्पतिः। हरयाणा साहित्यसंस्थानम्, गुरुकुलम् झज्जर, जि. रोहतक्। रू. ३-००.

स्वर्गीय-पण्डित-इन्द्र-विद्यावाचस्पतिमहाशयैर्विरचितोऽयं 'भारतेतिहास' नामको ग्रन्थविशेषः। गुणैकपक्षपाती इन्द्रवाचस्पतिः कालानुरोधं प्राचीन-

भारतपरिचयात्मकं इदमबध्नात् । त्रिंशदध्यायविभक्तेऽस्मिन् ग्रन्थे सूर्यचन्द्रवंशोत्पन्नानां चरितमितिहासद्वये यथादृष्टं तथोपवर्ण्य भारतेतिहासस्य अनितरसाधारणं वैशिष्ट्यं अप्रथयन् ॥ (कु. वे. शे.)

श्रीतिलकयशोऽर्णवः (खण्डद्वयसहितः)

माधवश्रीहरि अणे विरचितः । तिलकमहाराष्ट्रविद्यापीठसंपादकमण्डलेन संपादितः । तिलकमहाराष्ट्रविद्यापीठम्, पुण्यपत्तनम् । १९६९,७० ।

'लोकमान्ये'ति शब्देन प्रसिद्धिं गताः महापुरुषा बालगङ्गाधरतिलकाः अस्माभिरिदानीमनुभूयमानस्य स्वातन्त्र्यस्य अवाप्तये बीजमुप्तवत्सु नेतृषु मुख्याः दीर्घकारावासे आङ्ग्लेयाधिकारिभिः क्षिप्ताः; संस्कृते प्रवीणाः, गीताव्याख्यातारश्च । भारतीयैः सभक्ति स्मर्यमाणानां तेषां चरितविशेष एव 'श्रीतिलकयशोऽर्णव' नाम्ना प्रस्तुतः श्रीमाधव श्रीहरि अणे महोदयैः ।

लोकमान्यतिलकशिष्येष्वन्यतमो माधव श्रीहरि अणे महोदयः स्वगुरूणां लोकमान्यानां यशोवर्णनेन, प्रत्यक्षेणानुभूतं तिलकचरितमस्माकमुपायनीकृतवान् । स्वयमपि चरितस्यास्य प्रणेता स्वातन्त्र्यसमरे योधः स्वानुभूतिपुरस्सरं प्रत्यक्षतो वृत्तान् ऐतिहासिकान् विशेषानुपन्यस्य चरितस्यास्य प्रामणिकतामुपयुक्तां च संपादितवान् । अत्र योजितानि बहूनि छायाचित्राण्येव ग्रन्थस्यास्यैतिहासिकं गुणमुपबृंहयन्ति ।

काव्येऽस्मिन् महति ४१ तरङ्गाः, तथा १२,००० श्लोकाश्च सन्ति । प्रायोऽनुष्टुप्-छन्दसैव निबद्धोऽपि तत्र तत्र दीर्घाणि वृत्तान्तराणि च बिभर्ति । सुबोधया रीत्या भाषया च रचितं हृदयग्राहि भवति । कीर्तिशेषाः अणे महाशयाः, ग्रन्थप्रकाशकाः तिलकमहाराष्ट्रविद्यापीठाधिकारिणश्च धन्यवादार्हाः ॥ (वे. रा.)

मेघदूतम्

सुशीलकुमारः दे; द्वितीयं संस्करणम्, डा० वे. राघवः । साहित्यअकादेमी, नवदेहली । १९७०. रू. ६-५०.

कालिदासग्रन्थानां नूतनसंस्करणानि साहित्य-अकादेमी-परिषदा ऊरीकृतानि । तत्र प्रथमतया प्रकाशितं मेघदूतं प्रसिद्धेन विदुषा सु. कु. दे. महाशयेन सम्पादितं समीचनया प्रक्रियया । प्रथमसंस्करणपुस्तकानि क्रीतानि चिरं नोपलभ्यानि, छात्रैरध्यापकैश्च प्रार्थ्यमानान्यासन् । अतश्चेदं द्वितीयं संस्करणं साहित्य-अकादेमी कृते डा० राघवेण तत्र तत्र अपेक्षितमुद्रणदोषपरिहारादिना सम्पादितम् ॥ (कु. वे. शे.)

सफलो विद्यार्थी

श्रीरामचन्द्रो भारती, बी. ए. एल्. टी. । श्रीरामचन्द्रभारती २५१८, चूडीवालान्, देहली-६ । १९७०. रू. ४-२५ ।

'सफलो विद्यार्थी' नामकोऽयं ग्रन्थः अधुनातने भारते विद्यार्थिनां प्रबोधाय अत्यन्तमुपकारी भवति । प्राचीना अर्वाचीनाः ऐतिहासिकाः कथाश्चालम्ब्य छात्रधर्मजीवितभूताः ब्रह्मचर्य-विद्याग्रहण-मनोजय-गुरुभक्ति-देशभक्ति-पितृभक्ति-प्रभृतयो गुणाः, तथा सहयोगः, सौन्दर्यम्, भाषणकला, पुस्तकालयः, स्वातन्त्र्यम्, गावः, राष्ट्रध्वजः, सुरभारती, दानम्, ऐक्यम्-इत्याद्या विषयाश्च सरलया शैल्या अनतिदीर्घैः सन्दर्भैः बालप्रबोधनमत्र कृतं कविना श्रीरामचन्द्रेण । कविना कृतोऽयं सामाजिकसेवायां परिश्रमः प्रशंसार्हः ॥ (कु. वे. शे.)

पर्यटनशूरः सिन्दबादः

अनुवादकः-प्र. द. य. गम्भीरः भारतवाणी-प्रकाशनकार्यालयः, १४४२-४३, सदाशिव, पुण्यपत्तनम् ३०. १९६९ । रू. २-५०.

प्रसिद्धस्य सिन्दबादचरितस्य (Sindbad the sailor) संस्कृतानुवादरूपोऽयं लघुकथाग्रन्थः प्र. द. य. गम्भीरेण विरचितः । संस्कृतपिपठिषूणां बालकानां कृते अयं कथानुवादः अतीव उपकारको भवति । भाषा सरला, शैली च सुखावबोधा वर्तते । तत्र तत्र चित्राणि च योजितानि । ईदृशानि पुस्तकान्यद्य परःशतमपेक्षितानि ॥ (कु. वे. शे.)

सिद्धार्थचरितम् (नाटकम्)

डा० वीरेन्द्रकुमारभट्टाचार्यः श्रीश्यामपादभट्टाचार् जी, संस्कृतपुस्तक-भण्डार्, ३८, बिधान् सरणि, कल्कत्ता-६ । १९७० । साधारणस्य रू. १२-००, विशेषस्य रू. १५-०० ।

डा० वीरेन्द्रकुमारभट्टाचार्येण रचितमिदं 'सिद्धार्थचरितं' नाम नाटकम्, अहिंसाप्रचारकस्य शाक्यसिंहस्य उपश्लोकनपरं भवति । कविकालिदासशार्दूल-शकटादिदृश्यकाव्यप्रणयनेन प्रसिद्धिमुपगता एते भट्टाचार्याः स्वप्रतिभ-तूलिकया बुद्धदेवचरितं समुत्तेजयन् नूतनदृश्यकाव्यसंपत्तिमभ्यवर्धयन् । सुललितपदविन्यासैः गद्यबन्धैः अक्लिष्टपद्यबन्धैः, निसर्गमधुरभावाभिव्यञ्जकैः शब्दजालैश्चेद नितरां शोभते ।

ग्रन्थकर्तुर्वर्षद्वयाभ्यन्तर एव रचितेषु षट्सु प्रबन्धेष्विदमेकं नाटकमद्यत्वे जगति प्रसृताया: विविधवैनाशिकास्त्रप्रयुक्तहिंसाव्याधेरौषधभूतमहिंसाकरुणा-मूर्तेः भगवतो बुद्धस्य चरितं अष्टभिरङ्कैः समर्पयति । उदारोऽयं व्यवसायः श्रीवीरेन्द्रकुमारभट्टाचार्यस्य । नाटके बहवः श्लोकाः वर्तन्ते, तत्र निबन्धा वृत्तघटनायां बहुत्र स्वतन्त्रता प्रकटिता ॥ (वे. रा.)

निवेद्यम्

के. केशवन् नायर् । गीता मुद्रणालयः, श्रीशिवपुरम्-केरलः १९७० । रू. १-५०.

प्रायः आधुनिकं विषयजातं लक्ष्यीकृत्य उपनिबद्धानि इमानि पद्य-जातानि । कविना संकलितोऽयं पद्यनिकरः कवेः सहजं साहितीवैदुष्यमभि-व्यनक्ति । नानारसभावसुरभिलानि इमानि पद्यानि सहृदयमनांसि आवर्ज-यन्ति । 'मुक्तकानि' 'प्रभातसूर्यः' इत्यादिकं कविप्रतिभापरिचायकं भवति । (कु. वे. शे.)

रहस्यमयी (नाटिका)

प्रा. डा. के. रा. जोशी, एम्. ए. पी-एच् डी. भारतवाणीप्रकाशन-कार्यालयः, १४४९-४३, सदाशिव, पुण्यपत्तनम् ३०. १९६९ । रू १-००.

कविवरस्य रवीन्द्रनाथस्य लघ्वीषु कृतिषु रमणीयं यच्चित्रा-नामकं रूपकं, तदाधारीकृत्य संस्कृतभाषया सन्दब्धमिदं 'रहस्यमयी' नामकं रूपकम् । अत्र प्रसन्नमधुरायां शैल्यां महाकवेर्वाङ्मयं सुष्ठु प्रतिबिम्बितं लसति ॥ (वे. रा.)

प्रवरवरूथिनीयम्

कर्तारः-श्रीमन्तः सन्निधानं सूर्यनारायणशास्त्रिणः । आङ्ग्लानुवादकाः श्रीमन्तः पि० कृष्णमूर्तिमहोदयाः । चारी अण्ड् कम्पेनी, सिकन्दाराबाद्, १९७० । रू-१-००.

श्रीमद्विजयनगराधीशितुः श्रीकृष्णदेवरायस्य आस्थाने सुप्रसिद्धः 'आन्ध्रकवितापितामह' बिरुदाङ्कितः अल्लसानि पेद्दनार्यः । तेन आन्ध्रभाषायां विरचितं स्वारोचिषमनुसम्भवाख्यं रसवत्काव्यम् । आन्ध्रपञ्चमहाकाव्येषु अन्यतमत्वेन परिगण्यते इदं काव्यम् । तस्य प्रथममाश्वासद्वयं श्रीमन्तः सन्निधानं सूर्यनारायणशास्त्रिणः संस्कृतभाषायां अनूद्य आन्ध्रेतराणां संस्कृतज्ञानां बहूपकृतवन्तः । तेषां ग्रन्थस्य आङ्ग्लानुवादरूपः विमृश्यमानो ग्रन्थः ।

अनुवादोऽयं मूलमनतिक्रम्य सुलभया सुन्दरया च शैल्या राजते । रचयितॄणां श्रीमतां कृष्णमूर्तिमहोदयानां कृषिः प्रशंसनीया । अनुवादेन सह मूलग्रन्थोऽपि एकत्र मुद्रितः । किन्तु मूलग्रन्थस्तावत् आन्ध्रलिप्यामस्तीति परं विषादस्थानम् । तदनभिज्ञानां संस्कृतज्ञानां परमनुपकारकोऽयं ग्रन्थ इत्यत्र नास्ति संशीतिः । (डा. मु. न.)

वाणी

रचयिता-श्रीकर्णवीर-राजशेषगिरिराव् । प्राप्तिस्थानं-आन्ध्रभारतीप्रकाशन-मन्दिरम्, जाण्ड्रपेटा. चीराला (अन्ध्रप्रदेशः), १९७० । रू. १-००.

महात्मा गान्धिः, विनोबा भावे, कर्णवीर नागेश्वराः (रचयितुः पिता), इत्यादीन् अधिकृत्य विरचितानां श्लोकानां, गीतानां च समाहाररूपं वाणी-नामकं प्रकृतं पुस्तकम् । भगवत्प्रार्थनपराः केचन श्लोकाः भारतवीरप्रबोध-नात्मकानि गीतानि च कानिचन वर्तन्तेऽत्र ।

ईदृशस्य ग्रन्थस्य निर्माणेन कवेः संस्कृतरचनोत्साहः स्फुटं भवति । तथापि रचना नातीव सिद्धहस्ततां कवेः द्योतयति । छन्दोविरुद्धा अपि प्रयोगाः केषुचित् स्थलेषु उपलभ्यन्ते । (डा. मु. न.)

संस्कृतगीतिकाव्यानुचिन्तनम्

डा० नेमिचन्द्रशास्त्री एम्. ए. पी. एच्. डी० डी० लिट्०। चौखम्बा संस्कृतसीरिस्, पो० बो० नं० ८, वाराणसी । १९७० । साधारणस्य रू. १०-००, विशेषस्य रू. १२-००.

नेमिचन्द्रशास्त्रिभिः रचितमिदं 'संस्कृतगीतिकाव्यानुचिन्तनम्' पाश्चात्य-काव्यसम्प्रदायप्रसिद्ध 'लिरिक्' विभागदृष्ट्या भारतीयानां खण्डकाव्यानां सन्देशकाव्यानां गीतगोविन्दादीनां काव्यविभागानां सविस्तरं प्रतिपादनपरं भवति । संस्कृतसाहित्यानुशीलने नूतनोऽयं विषयविभागः ग्रन्थकृतानेन प्रस्तुतः । गद्यबन्धेन प्रवृत्तमिदमनुचिन्तनं ललितमनोज्ञं वर्तते । प्राक्कथनरूपेण डा० वे. राघवमहोदयैः ग्रन्थानुचिन्तितसंस्कृतगीतिकाव्यस्य (लिरिक्विभागस्य) स्वरूपविचारो विशेषतो द्रष्टव्यो भवति ॥ (कु. वे. शे.)

साहित्यरत्नकोशे

काव्यनाटकसङ्ग्रहे प्रथमो भागः-काव्यसङ्ग्रहः । निबन्धा डा. वा. श. अग्रवाला । सम्पादकः डा. वे. राघवः । साहित्य-अकादेमी, दिल्ली. १९७०.

संस्कृतसाहितीवैविध्यपरिचयलिप्सूनां पठितृणामुपयोगाय संपाद्यमाने साहित्यरत्नकोशमालायां काव्यनाटकसंग्रहे प्रथमो भागः प्रस्तुतो ग्रन्थः । प्रसिद्धानां माघभारविकालिदासादीनां, नातीव प्रसिद्धानां धनपालसोड्ढलजयरथ-नयचन्द्रादीनां च आहृत्य पञ्चविंशतिसंख्याकानां कवीनां ग्रन्थेभ्यः उद्धृत्य सरसतमाः केचन भागा अत्र प्रदत्ताः । संकलितेष्वेषु भागेषु २२ पद्यरूपाः, ८ गद्यरूपाः, ३ चम्पूरूपाः । डा. वा. श. अग्रवालामहोदयैः संकलितोऽयं ग्रन्थः । निपुणं संशोध्य विपुलां विषयानुक्रमणिकां, उद्धृतभागानामाकरसूचीं च संयोज्य डा. राघवमहोदयाः स्वसंपादनकार्येण ग्रन्थस्यास्य प्रामुख्यं द्विगुणीकृतवन्तः । एतस्य द्वितीयो भागः नाटकसंग्रहरूपः श्रीराघवार्यैरेव सम्पादयिष्यते, तत्प्रकाशनोन्मुखः सहृदयलोको वर्तते ॥ (डा. मु. न.)

प्रतापरुद्रीयम्

विद्यानाथप्रणीतम् । कुमारस्वामिविरचितरत्नापणव्याख्यानसहितम् । संपादकाः-डा. वे. राघवार्याः, मद्रपुरीसंस्कृतविद्यासमितिः, प्राच्य-माडवीथी, मद्रास्-४ । १९७०. रू. १०.

विद्यानाथकर्तृकः (१४ तमशताब्दी) प्रतापरुद्रयशोभूषणापरपर्यायः प्रतापरुद्रीयाख्योऽलङ्कारप्रकरणग्रन्थः बहोः कालात् पठनपाठनसम्प्रदाय-

लब्धप्रचार इति विदितमेव समेषाम् । बहुवारं मुद्रितपूर्वोऽप्ययं ग्रन्थः संप्रति नोपलभ्यत इति विद्यार्थिजनोपयोगमुद्दिश्य पुनर्मुद्रितः । तेषामेवोपयोगार्थं, चारित्रकदृष्ट्या ग्रन्थप्रामाण्यचर्चा, तदाधारभूतग्रन्थान्तरपरामर्शः, शय्या-पाकौ, वृत्ति-रीती, काव्यसामग्री, ध्वनिः, काव्यभेदाः, गुणालङ्कारावित्यादयो बहवो विषया यावदपेक्षं प्रतिपादिता इति पुस्तकमिदं श्लाघास्पदं भाति । सर्वोऽप्ययं विशेषपरिष्कारः सुप्रसिद्धगैर्वाणीप्राध्यापकैः विमर्शकाग्रेसरैः आलङ्कारिकमूर्धन्यैः डा० वे. राघवमहोदयैः समाविष्कृत इति महदिदं पदं प्रमोदाय संस्कृत-प्रणयिनाम् ।

एकावलीचमत्कारचन्द्रिकासाहित्यचिन्तामण्याद्यलङ्कारग्रन्थान्तरसमानजातीयकोऽयं ग्रन्थः तदपेक्षया प्रभूततमां प्रख्यातिं बहुलप्रचारं च लेभे इति, सर्वेषु चैतेषु ग्रन्थेषु भोजकृतसरस्वतीकण्ठाभरणशृङ्गारप्रकाशयोः प्रभावः स्पष्टमवगम्यत इति च विपुले उपोद्घाते डा० राघवमहोदयाः प्रतिपादयन्ति । मूलग्रन्थे उदाहृतानां श्लोकानां, ग्रन्थान्तराणां, तत्कर्तृणां, तथा व्याख्याने समुद्धृतानां श्लोक-ग्रन्थ-ग्रन्थकाराणां च सूच्यः बह्व्यः ग्रन्थस्यास्य प्रयोजनं प्रथयन्ति । अतिविपुलविषयसूची करबदरमिव ग्रन्थस्य तत्त्वं प्रकटीकरोति । उदाहृतवचनानामाकराश्च बहुषु स्थलेषु लक्षिता इति अन्यदिदं निदानं अस्य प्रकाशस्यादरणीयत्वे । एवं विद्यार्थिनां विमर्शकानां च उपकारकभूतेऽस्मिन् ग्रन्थप्रकाशने समुपलक्ष्यमाणा मद्रपुरी-संस्कृतविद्यासमित्याः संस्कृतसेवा सर्वथा प्रशंसामर्हति ॥ (डा० मु. न.)

व्याकरणचन्द्रोदयम् खण्डद्वयात्मकम्

लेखकः-श्री चारुदेव शास्त्री एम्. ए. एम्. ओ. एल् । प्राप्तिस्थानम्—मोतिलाल् बनारसीदास् [दिल्लि, वाराणसी-पटना] रू. ८-००; २२-५०.

शब्दापशब्दविवेकादिग्रन्थानां रचयिता श्रीमान् चारुदेवशास्त्रिवर्यः हिन्दी-भाषाविवरणेन साकं व्याकरणचन्द्रोदयनामकेऽस्मिन् ग्रन्थे बालानां पण्डितानां चात्यन्तोपयोगितया अष्टाध्यायीसूत्राणां विवरणम्, उदाहरणम्, उदाहरणानामर्थविवरणम्, तत्तदुदाहरणसमये प्रमुखग्रन्थेभ्यः सम्प्रतिपन्नानां प्रयोगाणां संकलनमिति च करोति । साम्प्रतमत्र अष्टाध्यायीक्रमेण प्रथमखण्डे कारकाणां

समासानां च विवरणं यथासूत्रं कृतम् । मध्ये सुबहु उपयुक्ता विषयाः प्रयत्नेनायोजिताः । तत्तत्सूत्रप्रकरण एव इष्टयुपसंख्यानवार्त्तिकादिगता अपि प्रयोगोपयोगिविषयाः संगृहीताः । धर्मकीर्तिमारभ्य प्रक्रियासर्वस्वकारान्तेषु वैयाकरेणषु प्रक्रियानुसारिव्याख्यातृषु प्रयत्नं कृतवत्स्वपि काशिकादिरीत्या पठनपाठनयोर्यावान् विषयबोधो झटिति जायते, न तावान् व्युत्क्रमेण सूत्राणां व्याख्यानेन इत्यत्र पठाका एव प्रमाणम् । अनुवृत्त्यादिबोधः सूत्रपाठक्रमे सुलभः, न व्युत्क्रमव्याख्याने । यथासम्भवं तत्तद्गणगतानामपि पदानां निष्पादनं कुर्वन्, केषाञ्चन पदानां यथाप्रमाणमर्थविवरणमपि शास्त्रिवर्यः प्रदर्शयतीति महदिदमामोदस्थानम् । पाणिनीयव्याकरणव्याख्यातृभिः अनेकेषु स्थलेषु साम्प्रदायिकार्थेभ्यो विचलनं कृतम्, विशिष्य भट्टिकाव्यकर्ताऽत्रापराध्यति इति यत् प्रथमखण्डोपोद्घाते प्रोक्तं ग्रन्थकारेण-तत् नूनं विचारहर्मति । भट्टिकाव्यव्याख्यानेषु, विशिष्य मल्लिनाथीये भट्टिकाव्यव्याख्याने यथासम्भवं ईदृशानामाक्षेपाणां परिहारः प्रदर्शितः । द्वितीयाप्रकरणे 'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु' (पु. ३६) इत्यत्र प्राचीनग्रन्थेषु (महाभाष्य एव) दृष्टः 'धिक्युपर्यादिषु' इति पाठः साधीयान् । अन्यथा 'धिक्' इत्यविभक्तिकमित्याश्रित्य सप्तमी छान्दसत्वात् लुप्तेति वक्तव्यं स्यात् अत्र 'उपर्यध्यधसः सामीप्ये' (८-१-७) इत्युपात्ता एव 'उपर्यादिषु त्रिषु' अनूदिताः; अत्र 'धिक्' इत्येतन्नान्वेतुं शक्यते ।

द्वितीयखण्डे कृदन्तानां (सोणादिकानां) तद्धितान्तानां च प्रयोगाणां विवरणं कृतम् । 'शेषे' (४-२-९२) इत्यस्य विवरणावसरे अपत्यादिचातुरर्थिकान्तभिन्ना एवार्थाः शेषशब्देन विवक्षिताः इति वैयाकरणाः प्राञ्चः । भोजस्तु नैतदनुमेने-यतोऽयं शेषशब्दस्यानुक्तसर्वार्थपरतामधिगत्य "कुक्षिं रक्षन्त्यस्मात् कौक्षेयकः कृपाणः-अग्निः पतत्यस्मात् आग्नेयो ग्रावा" इत्यादीनपि 'शेषे' इत्यनेन निष्पन्नान् मेने । तदत्र ग्रन्थकारेण खण्डितम् । वयं तु ब्रूमः-'तत्र जातः' (४-३-२५) इत्यत्र भाष्ये, काशिकायां च (४-२-९२) चातुरर्थिकान्तभिन्नानां सूत्रादिषु अपठितानां च अर्थानां 'दृषदि पिष्टाः सक्तवः दार्षदाः' इत्यादीनां दर्शनात् तदनुसारेणात्रापीत्याश्रयणे न कोऽपि विशेषः-इति ।

'कर्मण उकञ्' (५-१-१०३) इत्यत्र कर्मशब्दस्य सामान्यस्योपादानेऽपि 'कार्मुकम्' इति परिनिष्ठिते धनुष्परकत्वं शब्दशक्तिस्वाभाव्यात्-इति

एतावत्पर्यन्तं चिन्तितमासीत् । ग्रन्थकारस्तु सायणीयं वेदभाष्यमुदाहृत्य कृमुकस्य धनुष उपादानभूतस्य वृक्षविशेषस्य विकारः कार्मुकम इति विकारार्थकत्वमप्यभिप्रैति । कर्मठशब्दः यद्यपि कर्मणि यो घटते (घटः) तस्यैवेति ग्रन्थकारोऽभिप्रैति (पु. ४११) परं तु कर्मठशब्दः वैदिककर्मानुष्ठानपरे रूढः । सर्वथा बहुग्रन्थपरिशीलनसारभूतो बालानां विमर्शकानां चातीवोपयुक्तोऽप्ययं ग्रन्थो दाक्षिणात्यवैयाकरणनिकाये नातीवोपयुज्येत । यतो हिन्दीपरिचयशालिनः शास्त्रज्ञा विरला अत्र । तथापि भाषायाः सुगमत्वात् कथञ्चिदुपकारो भविष्यत्येव । शीघ्रमेवावशिष्टानामपि प्रकरणानां निदर्शितयैव दिशा प्रकाशनं भवेदिति विदित्वा उत्का वयम् । (वा. श्रीवत्साङ्काचार्यः)

वैद्यकसारोद्धारः

कर्ता-श्रीव्रजनाथशर्मा। संपादकौ-कविराज-धर्मनाथतर्कतीर्थः श्रीप्रतापचन्द्रचौधुरी च। बुरञ्जी-पुरातत्त्व-विभागः, असमः, गुवाहाटी १९६४। रू. २०-००

श्रीव्रजनाथशर्मणा रचितोऽयं 'वैद्यकसारोद्धार' नामकोऽयं ग्रन्थः कायचिकित्साप्रधानो वर्तते । प्रायशः सर्वेषामपि रोगाणां चिकित्सोपदेशः अत्र परामृष्टः । त्रयोविंशतिपरिच्छेदेन प्रविभक्तोऽयं ग्रन्थः चरककल्पो वर्तते । पञ्चकर्माणि, रोगिपरीक्षा (त्रयोविंशः परिच्छेदः), रसायनवाजीकरणोपदेशः (१९), विषरोगचिकित्सा (१८), स्त्रीरोगचिकत्सा (१६) इत्यादिकं विशिष्य चिकित्सकैः द्रष्टव्यम् । अत्रोक्ताः नूतनाः (शूल-गुल्म-हृद्रोगादिषु) योगाः चिकित्सकानामसाध्यानामपि रोगाणां साध्यताविषये विश्वासमुपजनयन्ति । हिन्दीविवरणेन सहितोऽयं वैद्यकसारोद्धारः नाम्ना अन्वर्थो भाति ॥ (कु. वे. शे.)

चरकचिन्तनम्

आचार्य प्रियव्रतशर्मा, चौखम्बा विद्याभवनम्, वाराणसी-१. १९७० । रू. ५-००.

'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' इति किल आयुर्वेदतन्त्रकाराः चरकसंहितामुद्दिश्य अभिप्रयन्ति । विषयगौरवेण महतः, प्रत्यक्षशास्त्रत्वेन सर्वजनादरणीयस्य चरकसंहिताग्रन्थस्य विमर्शनपरमिदं 'चरक-

चिन्तनम्' नामकं पुस्तकं आयुर्वेदाचार्यैः काशीहिन्दूविश्वविद्यालयायुर्वेदसंस्थान-निदेशकैः भिषक्कर्मसिद्धैः रचितं चकास्ति । सर्वजनोपकाराभिलाषया वैद्यसह-जपरोपकारचिन्तया च हिन्दीभाषया प्रवर्त्तितमिदं चरकानुशीलनं वैद्यविद्या-र्थिनाम्, अध्यापकानां, विमर्शकानां च कृते अत्यन्तोपकारकतया बहुमुखफलदं वर्तते । चरकस्य कालनिर्णये युक्तिसहकृतप्राचीनग्रन्थप्रमाणवाक्यजातप्रस्तावेन पूर्वपक्षप्रमाणाभासा निरस्ता अत्र ।

चरकः कः? तस्य वैद्यकाचार्यान्तराणां संबन्धः, चरकटीकाकाराः, इत्यादिकाश्च अत्र विवेचिताः ॥ (कु. वे. शे.)

स्मृति-ज्योतिषसारसंग्रहः

सम्पादकौ-श्रीमनोरञ्जनशास्त्री श्रीप्रतापचन्द्र चौधुरी च । बुरञ्जी-पुरा-तत्त्व-विभागः, असमः, गुवाहाटी १९६४ । रू. १०-००.

अस्मिन् सम्पुटे ग्रन्थत्रयं वर्तते-१. स्मृतिसागरसारो दामोदरमिश्र-विरचितः, २. ग्रहणकौमुदी पीताम्बरसिद्धान्तवागीशकृता ;-३. ज्योतिर्माला लक्ष्मीपतिशर्मणा प्रणीता । दामोदरः स्वग्रन्थं १२८६ क्रि. वर्षे व्यरचयत स्वस्यैव स्मृतिगङ्गाजलाख्यस्य ग्रन्थस्य संक्षेपतया । अत्र प्रथमाध्याये व्रतोत्सवादि; द्वितीये श्राद्धं चेति विषयद्वयं विचारितम् ।

अध्यायचतुष्टयमिते द्वितीये ग्रहणकौमुदीग्रन्थे ग्रहणं, तत्कालानुष्ठेयं च पीताम्बरेण परिशीलितम् । ग्रन्थश्चायं तेन क्रि. १६०८ वर्षे कृतः ।

ज्योतिर्माला क्रि. १६९१ वर्षे लक्ष्मीपतिना कृता । अत्र जातक-संस्कार-यात्रा-प्रकीर्णकानि व्याख्यातानि ।

एषां ग्रन्थानां मूलमातृका गौहाती-पुरातत्त्वविभागे हस्तलिखितकोशसङ्ग्रहे वर्तते । श्रीपण्डितमनोरञ्जनशास्त्रिणा श्रीप्रतापचन्द्रचौधुरीमहाशयेन च सम्पादितमिदं पुस्तकम् । प्रकाशनार्थं केन्द्रीयशिक्षामन्त्रालयतो धनोप-कारो दत्तः ॥ (वे. रा.)

१. विश्वामित्रसंहिता

श्रीमता उण्डेमने शङ्करभट्टेन संशोध्य संपादिता । १९८० ।

२. न्यायकल्पलतिका

पण्डितराजैः वे. सुब्रह्मण्यशास्त्रिभिः संपादिता । डा. वे. राघवार्या-णामाङ्गलभूमिकयालङ्कृता । १९७१ ।

केन्द्रीय - संस्कृतविद्यापीठम् , तिरुपति, आन्ध्रप्रदेशः ।

तिरुप्पतिक्षेत्रप्रतिष्ठापितेन केन्द्रीयसंस्कृतविद्यापीठेन प्रकाश्यमानायां ग्रन्थावल्यां आगमशास्त्रीयाः ग्रन्था अन्तर्भाविताः, यतो विद्यापीठेन ऊरीकृतं 'आगमकोश' नामकं महत् कार्यम् , तदर्थं च अप्रकाशिता अनुपलभ्यमानाश्च आगमग्रन्था मुद्रणार्थमुपात्ताः । अस्मिन् कार्यक्रमे 'विश्वामित्रसंहिता' नाम्नी पाञ्चरात्रसंहिताऽद्य प्रकाशिता । अस्याः सम्पादकः उ. शङ्करभट्टः विद्यापीठ-विद्वत्स्वन्यतमः । षण्मातृका आलम्ब्य परिष्कृतमिदं सम्पादनम् । अस्य संहितायां २७-अध्यायेषु समान्यत आगमगता विषया विमृष्टाः । सम्पाद-केन अन्ते विशिष्टा टिप्पण्यः, श्लोकानुक्रमणिका, पारिभाषिकशब्दसूची, मन्त्र-मुद्रादिसूची इत्याद्युपयोगि सर्वं सङ्कलय्य दत्तम् ॥

केन्द्रीयशिक्षा-सांस्कृतिक-मन्त्रालयेन समारब्धे अप्रकाशित-विशिष्टसंस्कृत-ग्रन्थप्रकाशनव्यवसायेऽन्तर्भूतं भवति द्वितीयनिर्दिष्टं पुस्तकम् । शाङ्कर-मतस्य मौलिकेषु ग्रन्थेषु भगवत्पादशिष्याणां सुरेश्वराचार्याणां बृहदारण्यक-भाष्यवार्त्तिकं किमपि प्राधन्यं बिभर्ति । तस्य आनन्दगिरिव्याख्या मुद्रिता प्रसिद्धा च । अत्र इदंप्रथमतया तद्वार्त्तिकम् आनन्दपूर्णविद्यासगरप्रणीतेन व्याख्यानेन दत्तम् । आनन्दपूर्णो ब्रह्मसिद्धिखण्डनखण्डखाद्यादिव्याख्याता न्यायचन्द्रिकादिप्रकरणप्रबन्धा गोकर्णक्षेत्रे मठाधीशः न्यायवेदान्तयोः प्रौढो विद्वानासीत् । इदं च व्याख्यानं बरोडाहस्तलिखितसङ्ग्रहे तथा ऐरोपाखण्डे जर्मन्-देशे टूबिङ्गन्-विश्वविद्यालये च विद्यमाने द्वे मातृके आलम्ब्य मुद्रितम । संपादनकार्यं प्रसिद्धैः न्यायवेदान्तविज्ञैः पण्डितराजैः वे. सुब्रह्मण्यशास्त्रिभिः सम्यङ् निर्वर्तितम् । तैरेव सम्पादकैः तत्र तत्र यावदपेक्षं टिप्पणी, आनन्दपूर्ण-आनन्दगिर्योः व्याख्यानयोर्विशेषाश्च दत्ताः । डा. वे. राघवार्याणामामुखेन भूषितमिदं पुस्तकं शोभतेतराम् ॥ (वे. रा.)

१. काश्मीरेतिहासः

विद्यापीठनिदेशकेन दा. मण्डलमिश्रेण सम्पादिता । रू. १५-००.

२. गीति-कादम्बरी

पण्डित श्री अमीरचन्द्रशास्त्रिभिः कृतानां खण्डकाव्यानां संग्रहः । रू. २०-००.

३. प्रमाणप्रमोदः

म. म. चित्रधरैः विरचितः, श्रीमत्या उज्ज्वलाशर्माख्यया सम्पादितः । रू. ७-५०.

४. अध्वरमीमांसाकुतूहलवृत्तिः

आचर्य श्रीपट्टाभिरामशास्त्रिभिः सम्पादिता (भागः १) रू. ३०-००.

श्रीलालबहादुरशास्त्री-केन्द्रीयसंस्कृतविद्यापीठम् १७३-डी० कमलानगरम्, देहली-७.

काश्मीरेतिहासनाम्नि प्रथमपुस्तके काश्मीरप्रदेशस्य वर्णनं, तस्य-प्राचीनत्वं, पावनत्वं, सौन्दर्यम्, शारदादेशत्वम् ; तदनन्तरं तत्राभिवृद्धा विद्याः, पालका राजानः; तदीयाः कवयो विद्वांसश्च; आधुनिक-काश्मीर-चरितम् ; इत्यादिकं सर्वं काश्मीरसर्वस्वभूते पुस्तकेऽस्मिन् वर्णितम् ।

विद्यापीठीयाध्यापकेषु श्रीमन्तः अमीरचन्द्रशास्त्रिणः सरसकवितागुण-विशिष्टाः । तैः कविवरैः नानाविषयकानि खण्डकाव्यानि यानि तदा तदा गीतानि तानि सङ्कलय्य प्रकाशितानि द्वितीयपुस्तके ।

प्रमाणप्रमोदो न्यायशास्त्रीयो ग्रन्थः । उज्ज्वलाशर्मा - नाम्न्या विदुष्या सम्पादिता । ग्रन्थो मैथिलेन चित्रधरशर्मणा रचितः (क्रि. १८ शतकम्) । अत्र प्रतिपाद्यो विषयः नैयायिकाभिमतम् ईश्वरस्वरूपम्, ईश्वरसत्त्वं च श्रुतिस्मृतिप्रमाणप्रदर्शनपुरस्सरं 'कार्यायोजनधृत्यादेः' इति उदयनाचार्यैः कुसुमाञ्जलिकारिकायां (५. १) दर्शिता युक्तीरालम्ब्य समर्थितम् ।

अध्वरमीमांसाकुतूहलवृत्तिः पूर्वमीमांसाशास्त्रीयो ग्रन्थः । ग्रन्थकर्ता च सुविदितो वैयाकरणः सिद्धान्तकौमुदीव्याख्याया बालमनोरमायाः कर्ता । तञ्जापुरसीम्नि महाराष्ट्रराजामात्यभूतानामानन्दरायादीनामेतद्वंशीया अध्वर्यव आसन् । यद्यप्ययं ग्रन्थः जैमिनिसूत्राणां व्याख्यारूपः, तथापि तत्र तत्र यथावकाशं क्रतुगतविशेषांश्च योजयन् 'अध्वर' वृत्तिरिति यथार्थं नाम बिभर्ति । एष चिरात्पूर्वं श्री एस्. कुप्पुस्वामिशास्त्रिभिः श्रीरङ्गस्थवाणीविलासमुद्रणालयद्वारा प्रकाशनार्थमुपात्तः, कियतोऽपि भागात्परं प्रकाशनं स्थगितमभूत् । स इदानीं केन्द्रीयशिक्षामन्त्रालयसाह्येन पूर्णं मुद्राप्य श्रीमद्भिः पट्टाभिरामशास्त्रिभिः प्रकाशितः ॥ (वे. रा.)

शारदा

विवेकानन्द विशेषाङ्कः १९७०. पुण्यपत्तनम्-३०. रू. १०.

सुविदिता शारदानाम्नी संस्कृतपत्रिका तदा तदा कालविशेषोचितान् विशेषाङ्कान् विषयभरितान् संपाद्य प्रकाशयति । अस्मिन् विशेषाङ्के गते वर्षे आघोषितं विवेकानन्दजन्म-शताब्दीमहोत्सवं द्वारीकृत्य डा. ग. बा. पळसुले नाम्ना विदुषा भारतराष्ट्रस्य आधुनिकयुगे कमपि विशिष्टमध्यात्मप्रबोधमुत्पादितवतो महापुरुषस्य विवेकानन्दस्य चरितमुपनिबध्य प्रकाशितं विराजतेतराम । प्रामाणिकानि स्वामिनो जीवनचरित्रपुस्तकान्यनुसृत्य शोभनया गद्यशैल्या आधारप्रदर्शनेन सह सन्दृब्धमिदं २३०-पत्रात्मकं चरितम् अतीव श्लाघ्यं कर्म श्रीपळसुलेऽत्र साधितवानिति तस्मै धन्यवादान् वितरामः । (वे. रा.)

OUR CONTRIBUTORS:

अस्यां सञ्चिकायां नूतनतया दृष्टा लेखकाः—

१. राधावल्लभः त्रिपाठी, संस्कृतविभागः,
सागरविश्वविद्यालयः, सागरः (म. प्र.) ।

Sri Radha Vallabha Tripathi, Samskrit Dept.
Sagaur University, Sagaur, M.P.

२. धू. अर्कसोमयाजी, एम्. ए., पी. एच् डि. केन्द्रीय-
संस्कृतविद्यापीठम्, तिरुपति ।

Dr. Arka Somayaji (Retd. Professor of Mathematics and Principal), Reader, Central Sanskrit Institute, Tirupati

३. जग्गू शिङ्गरार्यः, संस्कृतपण्डितः, तुंकूर्, मैसूर् ।

Sri Jaggu Singararya, Sanskrit Pandit,
Tumkur, Mysore.

प्रतिभोत्कर्षः

(संस्कृतप्रतिभापात्रिकाप्रशस्तिः)

ले. पै. श्रीसुन्दरगोपालाचार्यविरचितः

प्रतिभा प्रतिभां दोग्धु नितरां कविमानसे ।
यद्धारा कविचित्रस्य तूलिकेव विराजते ॥ १ ॥

नवनवपदगतिसुभगा
नवनवसन्दर्भसार्थकप्रचुरा ।
अनवमगुणरत्नौघा
वाणी बाभाति सांस्कृती युवतिः ॥ २ ॥

प्रतिभायाद्धृदि नित्यं
प्रतिभा संस्कारपुष्टरसधारा ।
प्रवहति भारतदेशे
या सर्वाज्ञानतापनिर्हन्त्री ॥ ३ ॥

सन्नीतेरास्थानी संगीतकलालयः प्रशिल्पाब्धिः ।
रसपूरकाव्यवेणी संस्कृतवाणी न रोचते कस्मै ॥ ४ ॥

श्रोत्ररसायनसुस्वरपदसुमसंग्रथितसंस्कृतैवोक्यैः ।
वेदोऽनादिः सततं पुरुषमनादिं सदा स्तुवन्नास्ते ॥ ५ ॥

नानासत्कविनिचयप्राच्यविशिष्टार्थगर्भिता प्रतिभा ।
प्रत्यङ्मुखीं प्रवृत्तिं सन्धुक्षयति प्रकाममस्माकम् ॥ ६ ॥

नवरससंपरिपूर्णां प्रतिभां दृष्ट्वा हि सुन्दरो गोपः ।
श्लोकैस्सप्तभिरतनोदभिनन्दनमत्र तुष्यताद्देवः ॥ ७ ॥

THE WORKS OF D.C. DATTA,

Published by

The International Library, P. O. Box 149

JAIPUR, RAJASTHAN, INDIA.

"स्वर्वज्ज्योतिरवृकं नशीमहि"

1. Saraswati and Other Sonnets (108). 2. Sonnets to Islam and the Arabs (111) Hindoostanee Simplified in Persian Characters (400) and Key (64), 1924, are out of print.

In the Press

The Second Edition of the following:

1. Christmas 1935 and Other Verses. 2. Exegi Monumentum and Lyrics. 3. *Meghaduta* in English Verse. 4. & 5. Rubaiyat (443, 62) of Abu Saeed Abul Khayr & Baba Tahir in English Verse.

In the Press

1. *The Bhagavadgita* in English Verse (*terza rima* and other metres) 2, 3, 4, Michael Madhusudan Dutt's 'Bengali Sonnets' (108) in English Verse, *Meghanadavadha* in English Blank Verse, Bengali Sonnets and 2 Cantos of *Meghanadavadha* in Sanskrit Blank Verse 5. Jaishankar Prasad's *Kamayani* in English Verse. 6. The Qu-rān in English Translation. 7. The Qu-rān for All (summarised from the above). 8. A Golden Treasury of Persian Quatrains (selected from 35 poets). 9. Euripides on Woman, Love, Marriage and Politics (Greek with English translation). 10, 11, 12, 13, Fnglish Verse translations of सुभाषगौरवम, रवीन्द्रप्रतिभा, वङ्गविभावरी, भारतगाथा (मन्दाक्रान्ताशतके).

In Preparation

1. The Rigveda and the Age of Science. 2. The Qu-rān and the Modern World. 3. The Greatness and Grandeur of the Qu-rān. 4. Reflexions from Some Sanskrit Classics with English translation. 5. Selections from *Mutanabbi*, with English translation. 6. How to Play the 18 *Kanhras* on the *Veenā*.

JUST RELEASED

Reviews by M. Hiriyanna with a Foreword by Dr. V. Raghavan	Rs,	30	00
Other works by Prof. Hiriyanna;			
Popular Essays in Indian Philosophy	Rs.	7	50
The Quest after Perfection	Rs,	7	50
Art Experience	Rs.	7	50
Sanskrit Studies	Rs.	5	00
The Mission of Philosophy	Rs.	7	50
Indian Philosophical Studies-I	Rs.	7	50

KAVYALAYA PUBLISHERS * MYSORE 4

STATEMENT ABOUT OWNERSHIP AND OTHER PARTICULARS ABOUT SAMSKRITA PRATIBHA

FORM IV

(AS REQUIRED BY RULE 8 OF PRESS REGISTRAR'S ACT)

Place of Publication	..	7, Sri Krishnapuram Street, Madras-14
Periodicity of Publication	..	Half-yearly
Printer's name and address	..	M.L.J. Press Private Ltd., 55-56, Mundakanni Amman Koil St., Madras-4
Publisher's Name	..	Dr. V. Raghavan
Nationality	..	Indian
Address	..	7, Srikrishnapuram Street, Madras-14
Editor's Name	..	Dr. V. Raghavan
Nationality	..	Indian
Address	..	7, Srikrishnapuram Street, Madras-14
Owner's Name	..	Sahitya Akademi,
Address	..	Rabindra Bhavan, Ferozeshah Road, New Delhi

I, V. Raghavan, hereby declare that the particulars given above are true to the best of my knowledge and belief.

20-5-1971

V. RAGHAVAN.
Signature of Publisher

साहित्य-अकादेमी-परिषदा प्रकाशिताः संस्कृतग्रन्थाः

कालिदासग्रन्थाः—

बहुमातृकापरिशोधनपूर्वं नूतनतया सम्पादिताः सोपोद्घाताः सटिप्पणाः ।

१. मेघदूतम्—सु. कु. दे.—विशिष्टं संपुटीकरणम्—
$ 1-50, 10 Sh. 6 d. Rs. 5. 00; साधारणम्—Rs. 2-50.
द्वितीयावृत्तिः डा. वे. राघवेन सम्पादिता Rs. 6-50.

२. विक्रमोर्वशीयम्—ह. दा. वेलणकरः—वि.सं. $ 3-00, 21 Sh. Rs. 8-00; सा. Rs 6.

३. कुमारसम्भवः—सूर्यकान्तः—वि.सं. $ 5-00, 37 Sh., Rs. 12-50; सा. Rs. 10. 00.

४. अभिज्ञानशाकुन्तलम्—एस्. के. बेल्वाल्कर् सा. Rs. 5. 00.

मुद्र्यमाणानि अथवा सम्पाद्यमानानि

५. मालविकाग्निमित्रम्—के. ए. एस्. अय्यर्

६. रघुवंशः—वे. राघवः

७. ऋतुसंहारः—पि. एम्. लाड् —वे. राघवः

कोशावलिः—

१. पुराणेतिहाससंग्रहः—सु. कु. दे—रा. च. हस्रा—वि. सं. $ 4-00, 25 Sh., Rs. 10-00 ; सा. Rs. 7-50.

२. बौद्धसंग्रहः—नलिनाक्षदत्तः—वि. सं. $ 4-00, 25 Sh., Rs. 10-00; सा. Rs. 7-50.

३. अभिलेखसंग्रहः—ब. च. छाब्रा
वि. सं. Rs. 8-50, सा. Rs. 7-00.

४. वेदशास्त्रसंग्रहः—वि. ब. शास्त्री. Rs. 15-00.

५. काव्यनाटकसंग्रहः—१ भागः—वा. श. अग्रवालः—वे. राघवः
वि. सं. Rs. 12-00.

अन्यत् प्रकाशनम्

६. अशोकावदानम्—सु. कु. मुखोपाध्यायः
वि. सं. Rs. 8-50, सा. Rs. 7-00.

७. संस्कृतरवीन्द्रम—सं. वे. राघवः Rs. 12-50.

मुद्र्यमाणा अथवा सम्पाद्यमानाः

८. काव्यनाटकसग्रहः—२ भागः—वे. राघवः

९. जैनसंग्रहः—ही. ला. जैनः

१०. सुभाषितसंग्रहः—के. ए. एस्. अय्यर्—वे. राघवः

'संस्कृतप्रतिभा'

वदन्ती विविधां वाचमेका भारतसाहिती ।
द्राविड्यामथ वङ्ग्यां वा भाल्येको भारतो गुणः ॥

समानं मूलमेतस्याः सम्प्रदायाः समास्तथा ।
वासनाः प्रेरका भावा बाह्या आभ्यन्तराः समाः ॥

एकैव भारती संविद् अध्यात्मगुणवासिता ।
ऐकात्म्यं नयति ह्येता विचित्रप्रसरा गिरः ॥

मधुच्छन्दा रवीन्द्रश्च बुद्धो गान्धिश्च यज्ञगौ ।
तस्य भाषा मनाग् भिन्ना परिभाषा न भिद्यते ॥

देशतः कालतः प्राप्तचित्रप्रसरशालिनः ।
साहित्यस्यास्य दृश्येते बीजमैक्यं च संस्कृते ॥

अर्थतः शब्दतश्चापि सर्वं भारतवाङ्मयम् ।
ओतप्रोततया व्याप्य संस्कृतब्रह्म राजते ॥

मनुं व्यासं च वाल्मीकिं कालिदासं च शङ्करम् ।
कवींश्च शास्त्रकारांश्च व्याख्यातॄन् मतदेशिकान् ॥

उत्पाद्य नैव विरता संस्कृतप्रतिभाखनिः ।
अद्यापि नवरत्नानां प्रसवित्री प्रकाशते ॥

धर्मो ब्रह्म रसो नाम शिवं सत्यं च सुन्दरम् ।
या त्रिधा तत्त्वमूचे तां संस्कृतप्रतिभां नुमः ॥

सम्पादकः

वे. राघवः